वर्षम्-९

ISSN : 975-2676

अङ्कः-३४

# संस्कृतवार्ता

## राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५२४२ वैक्रमाब्दः २०७३ आश्विन-कृष्णः ३० - पौष-शुक्लः २ शकः १९३८ अक्टूबर २०१६ - दिसम्बर २०१६



युवमहोत्सवं दीपप्रज्वालनेन उद्घाटयन् कुलपतिवर्यः



युवमहोत्सवे मुख्याभ्यागतां दीपाकर्माकरमहाभागां (ओलम्पिकप्रतिभागिनी) सम्मानयति कुलपतिवर्यः




युवमहोत्सवस्य सम्पूर्तिसत्रे मञ्चासीनाः महामहिमराज्यपालाः श्रीतथागतरायवर्याः अतिथयश्च

### कुलपतिवाक्

**देवस्य पश्य काव्यं न ममार न जीर्यति- अथर्व।**

उत्तमं कार्यं सर्वदा स्मर्यते। समाजोपकारकं कर्म सर्वथा श्रेयसे कल्पेत। सत्क्रिया जीवलोकं पुनाति। अतः अथर्वोक्तिः ख्यापयति श्रेष्ठकृतेः मरणं जरणं च नास्तीति।

प्राचीनमर्वाचीनं, लौकिकमलौकिकं च ज्ञानं विज्ञानञ्च आत्मासात्कर्तुं प्रयतते लोकः। ज्ञानादृतः समाजः विश्वस्य मूर्ध्नि शोभते। ज्ञानचन्द्रं शिरसि संस्थाप्य राष्ट्रमग्रेसरति। तादृशं भारतम् अस्माकं स्वप्नः। एतदर्थं समर्थमाध्यमेषु संस्कृतम् अन्यतमं वर्तते। ज्ञानविज्ञानसमृद्धं साहित्यं प्राचीनेन सह अत्याधुनिकं चिन्तनम्, आविष्कर्तुं समर्पकः बौद्धिकः परिवेषः, क्रियान्वयनाय शासकीयं प्रोत्साहनम् इति त्रितयं समुल्लसति। तत्त्वं तत्त्वज्ञश्च परस्परं घटते। ''प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः'' इति गीतावाक्यं स्मरामः।

दानं, दया, त्यागः, ज्ञानमित्यादयः जगति श्रेष्ठतां भजन्ते। तत्रापि ज्ञानं सर्वश्रेष्ठम् इति कीर्तयन्ति। विना ज्ञानं मनुष्यः पशुतुल्यो भवति। ज्ञानार्जनस्य निदानम् अध्ययनमध्यापनमिति स्वतस्सिद्धमस्ति। भाषा खलु स्वाभिव्यक्तेः अनितरसाधारणं साधनम्। जन्मतः आरभ्य शिशुः यदधीते तत्र भाषा नितरां प्रभावयति। अधीतस्य अभिव्यक्तिरपि भाषया सेत्स्यति। तत्तद्भाषानिबद्धाः ग्रन्थाः पठन-पाठन-सन्दर्भे भृशं सहकुर्वन्ति। अस्यां प्रक्रियायां संस्कृतभाषा बहुभिः कारणैः विशिनष्टि। इयं सुरभारती भाषान्तरप्रसूर्निजमहिम्ना मानवम् आश्चर्यसागरे सदा निमज्जयति। अत्र चिन्तकाः बहुधा विश्लेषयन्ति।

तथा च ज्ञानार्जनप्रक्रियायां भाषाया महत्त्वम् अभिज्ञाः स्वीकुर्वन्ति। विशिष्य संक्षेपविस्तराभ्यां यं कमपि विषयम् इदमित्थमिति निरूपयितुं प्रभवति संस्कृतभाषा। अस्मिन् ज्ञानयज्ञे संस्कृतभाषामाध्यमेन तपः चरितुं सन्नद्धा भवेम। सेऽयं संस्कृतवार्ता पवित्रे कर्मणि स्वाहुतिं दातुं प्रभवेत् इति आशासे।

**''यद् भद्रं तन्न आसुव- यजु.**

**(Let us attain whatever beneficial to us)**

*–परमेश्वरनारायणशास्त्री*

**मुख्यपरामर्शदाता**

प्रो. परमेश्वरनारायणशास्त्री

कुलपतिः

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**परामर्शदातृमण्डलम्**

प्रो. सुब्रह्मण्यशर्मा

प्रो. मनोजकुमारमिश्रः

प्रो. सुकान्तकुमारसेनापतिः

**सम्पादकः**

डा. मधुकेश्वरभट्टः


'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायं, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**

संस्थानस्य जालपुटेऽपि संस्कृतवार्ता द्रष्टुं शक्यते-
**www.sanskrit.nic.in**


संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

**ISSN : 975-2676**

प्रकाशकः

**कुलसचिवः**

**राष्ट्रियसंस्कृतसंस्थानम्**

(राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्यां प्रत्यायितः, भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-110058

011-28524993, 28521994, 28520977

email : rsks@nda.vsnl.net.in

website : www.sanskrit.nic.in


## प्रतिस्पन्दः




राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकी वार्तापत्रिका संस्कृतवार्ता राष्ट्रियसंस्कृतसंस्थानस्य तथा च तदीयपरिसराणां कार्यकलापस्य ज्ञानाय काचित् तरणीरिव विद्यते।

-राकेशः, उत्तरप्रदेशः


## समाचरितः सतर्कताजागरूकतासप्ताहः राष्ट्रियैकतासप्ताहश्च



उद्घाटनकार्यक्रमस्य एकं दृश्यम्

भारतसर्वकारस्यादेशानुसारं ३१.१०.२०१६ तः ०५.११.२०१६ पर्यन्तं सतर्कताजागरूकतासप्ताहः ३१.१०.२०१६ तः ०६.११.२०१६ पर्यन्तं राष्ट्रिय-एकतासप्ताहश्च राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये समाचरितः। कार्यक्रमम् उपलक्ष्य कार्यालयीयकर्मचारिणां कृते भाषणस्पर्धा च समायोजिता। सतर्कताजागरूकतायाः राष्ट्रियैकतायाः च शपथग्रहणमपि अकारि। सन्दर्भेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य परीक्षानियन्त्रकः आचार्यः सुकान्तकुमारसेनापतिवर्यः, राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवचरः डॉ.सि. गिरिमहाभागः च उपस्थितः आसीत्। राष्ट्रियसंस्कृतसंस्थानस्य अनुसंधानप्रकाशनविभागस्य अध्यक्षः आचार्यः मनोजकुमारमिश्रवर्यः राष्ट्रियैकतायाः महत्त्वं सतर्कताजागरूकतायाः विशेषं च प्रास्तौत्। राष्ट्रियैकतासंपादने सरदारवल्लभभाईपटेलप्रभृतयः नैके महानुभावाः परिश्रमं व्यधासिषुः। तेषां परिश्रमः सर्वदा स्मरणीयः, अपि च राष्ट्रियैकताविषये अस्माकं योगदानस्य अपेक्षा अस्ति इति राष्ट्रियसंस्कृतसंस्थानस्य परीक्षानियन्त्रकः कार्यक्रमस्य अध्यक्षश्च आचार्यः सुकान्तकुमारसेनापतिवर्यः अवोचत्।

## सायुज्यम् अवाप आचार्यः रामानुजदेवनाथवर्यः



सकलप्राचीनार्वाचीनविषयसागरतरणे पटिष्ठः विद्याविद्योतितान्तःकरणः विद्वत्प्रियः छात्रवत्सलः श्रीजगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतिचरः राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवचरः श्रीरणवीरपरिसरस्य प्राचार्यः आचार्यः रामानुजदेवनाथवर्यः सायुज्यम् अवाप इत्ययं विषयः संस्कृतलोकं शोकगहनावर्तसागरे निमज्जयति। शोकसहनसामर्थ्यं संस्कृतपरिवाराय तेषां परिवाराय च अनीकेश्वरः प्रयच्छतु इति अनाथनाथं श्रीनाथं प्रार्थयामहे।

## सप्तचत्वारिंशः स्थापनादिवससमारोहः



दीपं प्रज्वलयन् प्रो. राधावल्लभत्रिपाठिवर्यः

संस्कृतस्य प्रसाराय प्रचाराय च भारतसर्वकारेण स्थापितस्य राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य द्वादशपरिसराः आभारतं विलसन्ति। अस्य संस्थानस्य सप्तचत्वारिंशः स्थापनादिवससमारोहः १५.१०.२०१६ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य सारस्वतसभागारे सम्पन्नः। अस्मिन् कार्यक्रमे राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिचरः नाट्यशास्त्रमर्मज्ञः शास्त्रगृह्यः आचार्यः राधावल्लभत्रिपाठिवर्यः सारस्वतातिथिरूपेण, मुख्यातिथिरूपेण सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरः आचार्यः अभिराजराजेन्द्रमिश्रवर्यः, अध्यक्षरूपेण राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः परमेश्वरनारायणशास्त्रिवर्यः, कुलसचिवः आचार्यः एस्. सुब्रह्मण्यशर्मवर्यः, मानवसंसाधनमन्त्रालयस्य पदाधिकारी श्री पवनमेहता, मुक्तस्वाध्यायपीठस्य निदेशकः आचार्यः रमाकान्तपाण्डेयवर्यश्च सम्मिलितः आसीत्। संस्कृतं शान्तिं प्रयच्छति यस्यां भाषायां विद्यमानं ज्ञानराशिम् अधिगन्तुं पाश्चात्त्याः अपि उत्काः सन्ति। राष्ट्रियसंस्कृतसंस्थानम् एतादृशमनुष्ठानं विद्यते यत् भारतस्य विभिन्ना संस्कृतिः संस्थानस्य परिसरद्वारा विज्ञायते। संस्थानेन नैके कार्यक्रमाः अनुष्ठीयन्ते। तथा च नाट्यरङ्गमञ्चविषये अभिनिवेशः अन्तर्जाले संस्कृतसाहित्यस्य निक्षेपः च अपेक्षितो वर्तते इति आचार्यः राधावल्लभत्रिपाठिवर्यः अवदत्। येषां महानुभावानां प्रयासेन इदं संस्थानं समग्रे भारते कीर्तिं प्रसारयद् वर्तते तत्र कारणीभूताः सर्वे नम्याः प्रातःस्मरणीयाश्च विद्यन्ते इति संस्थानस्य कुलपतिः आचार्यः परमेश्वनारायणशास्त्रिवर्यः अवदत्। कार्यक्रमे स्वागतं मुक्तस्वाध्यायपीठस्य निदेशकः आचार्यः रमाकान्तपाण्डेयवर्यः, धन्यवादञ्च संस्थानस्य कुलसचिवः आचार्यः एस्. सुब्रह्मण्यशर्मवर्यः च व्यतरत्।




प्रो. अभिराजराजेन्द्रमिश्रवर्यं सम्मानयति कुलपतिमहोदयः



स्थापनादिवसकार्यक्रमस्य एकं दृश्यम्



धन्यवादं समर्पयन् कुलसचिवमहोदयः

## सम्पन्ना पालि-प्राकृत-कार्यशाला



कार्यशालायाः उद्घाटनं विदधानः कुलपतिमहोदयः

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये २८.०९.२०१६ दिनाङ्कात् ०७.१०.२०१६ दिनाङ्कं यावत् दशदिवसीया प्राकृतकार्यशाला समायोजिता। अस्याः कार्यशालायाः उद्घाटनं राष्ट्रियसंस्कृतसंस्थानस्य माननीयैः कुलपतिभिः प्रो. परमेश्वरनारायणशास्त्रिभिः व्यधायि। ते प्राकृतभाषायां निबद्धानां साहित्यानां प्रसाराय प्रचाराय च संस्थानं कृतसंकल्पमिति प्रकटयन्तः सर्वे विशेषज्ञाः शोधार्थिनः च कार्यनिष्पादनाय समर्पणभावेन कार्यं कुर्युः इति अबोधयन्। अस्यां कार्यशालायां प्राकृत-संस्कृतविषयेषु विशिष्टाः प्रो. दामोदरशास्त्री, प्रो. सुदीपकुमारजैनः, प्रो. दीनानाथशर्मा, प्रो. सलोनीजोशी, प्रो. रामजीरायः, डॉ. अशोककुमारसिंहश्च आमन्त्रिताः विद्वांसः समुपस्थिताः। कार्यशालायाः उद्देश्यादिकं सविस्तरं डॉ. आर.जी. मुरलीकृष्णेन (प्रभारी, परियोजना) विदुषां समक्षं प्रास्तावि। कार्यशालायाः समापनदिवसे राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवमहोदयः प्रो. एस्. सुब्रह्मण्यशर्मवर्यः उपस्थाय संस्थानस्य वैशिष्ट्यं पालि-प्राकृतभाषाभ्यां सह सदैव तनुत इति प्राबोधयत्। अस्यां कार्यशालायां पञ्चानां प्राकृतसाहित्यानाम् आधारेण शोधार्थिभिः कृतकार्याणां संस्कारः विहितः। तेषां नामानि यथा-



कार्यशालायाः इतिवृत्तं प्रस्तौति डॉ. आर्.जी. मुरलीकृष्णः

१. पउमचरियं : प्रथम - संस्कृतच्छाया हिन्दी-अनुवादश्च (डॉ. प्रभातकुमारदासः)
२. भगवई-आराहणा - संस्कृतच्छाया हिन्दी-अनुवादश्च (डॉ. सतेन्द्रकुमारजैनः)
३. गणिविज्जासुत्तं - संस्कृतच्छाया हिन्दी-अनुवादश्च (डॉ. सतेन्द्रकुमारजैनः)
४. गाहारणकोसो - संस्कृतच्छाया हिन्दी-अनुवादश्च (डॉ. सुमतकुमारजैनः)
५. मागधी प्राकृत : एक खोज (पांच खंड) - भाषा हिन्दी (डॉ. सुदर्शनमिश्रः)

मुख्यालयवार्ता

## ससन्तोषं समाचरितः नवमः अन्तःपरिसरीययुवमहोत्सवः



युवमहोत्सवस्य सम्पूर्तिसत्रे दीपं प्रज्वलयति कुलपतिवर्यः



युवमहोत्सवस्य सम्पूर्तिसत्रे मञ्चासीनाः महामहिमराज्यपालाः तथागतरायवर्याः अतिथयश्च

राष्ट्रियसंस्कृतसंस्थानस्य परिसरच्छात्राणां शैक्षिकसांस्कृतिकचित्रकलाक्रीडास्पर्धासु पाटवसम्पादनाय प्रतिवत्सरम् अन्तःपरिसरीययुवमहोत्सवः समायोज्यते। ऐषमः नवमः अन्तःपरिसरीययुवमहोत्सवः १८.११.२०१६ तः २१.११.२०१६ दिनाङ्कं यावत् त्रिपुराराज्यस्य अगरतलास्थे एकलव्यपरिसरे ससन्तोषं समनुष्ठितः। अस्मिन् अन्तःपरिसरीययुवमहोत्सवे शैक्षिकसांस्कृतिकचित्रकलाक्रीडास्पर्धासु संस्थानस्य परिसरीयाः छात्राः सोत्साहं भागम् अग्रहिषुः। १७.११.२०१६ दिनाङ्के युवमहोत्सवस्य सांस्कृतिकदीपप्रकाशनपरा भव्या शोभायात्रा त्रिपुराराज्यस्य लोकवाद्यैः सह अगरतलानगरे समजनि। तत्तत्प्रान्तीयवेशभूषया सह संभूषितान् छात्रान् दर्शं दर्शम् आनन्दम् अविन्दन्त नागरिकाः। १८.११.२०१६ दिनाङ्के क्रीडास्पर्धायाः उद्घाटनं ध्वजोत्तोलनेन कुलपतिभिः आचार्यैः परमेश्वरनारायणशास्त्रिवर्यैः समकारि। ततः प्रवृत्ते शैक्षिकादिस्पर्धानाम् उद्घाटनसत्रे राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः परमेश्वरनारायणशास्त्रिवर्यः अध्यक्षपदम् आचार्यः सीतानाथ डे महाभागः मुख्यातिथिपदं च समवहत्। एवं संस्थानस्य परिसरप्राचार्याः अपि मञ्चं समलमकुर्वन्। अवसरेस्मिन् एकलव्यपरिसरस्य प्रभारिप्रचार्यः आचार्यः खगेश्वरमिश्रवर्यः पुष्पकदम्बं समर्प्य अतिथीनां स्वागतं व्यदधात्। अध्यक्षपदं वहता राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिना आचार्येण परमेश्वरनारायणशास्त्रिवर्येण स्पर्धया मनः प्रफुल्लं भवति। जयः पराजयश्च समानतया स्वीकार्यः। पराजय एव जयस्य सोपानम् इति अवादि। उद्घाटनकार्यक्रमान्ते आचार्यः धनीन्द्रझावर्यः धन्यवादं व्याहरत्।

ततः दिनत्रयं यावत् बहवः स्पर्धाः समजायन्त। शैक्षिकस्पर्धासु कण्ठपाठ-अनुवाद-वादविवाद-सङ्गणकीय-स्फूर्तिस्पर्धाः आसन्। एवं सांस्कृतिकस्पर्धासु एककसंकृतिगीत-शास्त्रीयगान-वादन-नृत्याभिनयस्पर्धाः अवर्तन्त। चित्रकलास्पर्धासु आशुचित्रण-भित्तिचित्रण-व्यङ्ग्यचित्रण-रङ्गवल्लीस्पर्धानाम् आयोजनम् अकारि। क्रीडास्पर्धासु खो-खो, कबड्डी, हस्तकन्दुकम्, धावनम्, चक्रक्षेपणम्, योगासानम् इत्यादिस्पर्धाः समजायन्त। आसां स्पर्धानां निर्णायकेषु प्रो. अभिराजराजेन्द्रमिश्रवर्यः, विद्वान् जनार्दन हेगडे, डॉ. विश्वासः, प्रो. विरूपाक्ष जड्डीपालः, प्रो. मुरलीधरशर्मा इत्यादिप्रथितैः विद्वद्भिः सह भारतीयक्रीडाप्राधिकारस्य पदाधिकारिणः समवेता आसन्।



युवमहोत्सवे प्रो. मुरलीधरशर्माणं सम्मानयति प्राचार्यः

२१.११.२०१६ दिनाङ्के अपराह्णे युवमहोत्सवस्य संपूर्तिसमारोहः समनुष्ठितः। समारोहेस्मिन् त्रिपुराराज्यस्य महामहिमराज्यपालाः श्रीमन्तः तथागतरायमहोदयाः मुख्यातिथिपदं समलमकुर्वन्। एतेषां स्वागतं पुष्पगुच्छेन संस्थानस्य कुलपतिवर्यैः व्यधायि। स्वागतभाषणं रणवीरपरिसरप्राचार्यैः आचार्यैः रामानुजदेवनाथवर्यैः कृतम्। युवमहोत्सवस्य सर्वासु स्पर्धासु अत्यधिकान् अङ्कान् अवाप्य शृङ्गेरीस्थः राजीवगान्धीपरिसरः विजयवैजयन्तीम् अलभत। द्वितीयस्थानं हिमाचलप्रदेशस्थ-वेदव्यासपरिसरः अविन्दत। कार्यक्रमस्य अन्ते धन्यवादम् एकलव्यपरिसरप्राचार्यः आचार्यः सर्वनारायणझावर्यः व्यज्ञापयत्।

युवमहोत्सवः

### युवमहोत्सवस्य विजयिनां सूची

**सुभाषितकण्ठपाठः ( बालकानाम् )**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | प्रतीमप्रकाशपाढी | सदाशिवपरिसरः, पुरी |
| २. | द्वितीयपुरस्कारः | गौरवः | वेदव्यासपरिसरः, बलाहरः |
| ३. | तृतीयपुरस्कारः | भास्कर बेनर्जी | एकलव्यपरिसरः, अगरतला |

**सुभाषितकण्ठपाठः ( बालिकानाम् )**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | योगिता डि.छत्रे | राजीवगान्धीपरिसरः, शृङ्गेरी |
| २. | द्वितीयपुरस्कारः | दुर्गा एस् नम्बूदरि | गुरुवायूरु-परिसरः, गुरुवायूरु |
| ३. | तृतीयपुरस्कारः | संध्या त्रिपाठी | लखनऊपरिसरः, लखनऊ |

**वादविवादस्पर्धा ( पक्षे )**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | उमामहेश्वरः एन्. | राजीवगान्धीपरिसरः, शृङ्गेरी |
| २. | द्वितीयपुरस्कारः | सोहन आर्यः | भोपालपरिसरः, भोपालः |
| ३. | तृतीयपुरस्कारः | हरिप्रसाद् एस् | गुरुवायूरु-परिसरः, गुरुवायूरु |

**वादविवादस्पर्धा ( विपक्षे )**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | सुर्यहेब्बारः ए. | राजीवगान्धीपरिसरः, शृङ्गेरी |
| २. | द्वितीयपुरस्कारः | अविनाश भोई | सदाशिवपरिसरः, पुरी |
| ३. | तृतीयपुरस्कारः | पंकजः | वेदव्यासपरिसरः, बलाहरः |

### स्फूर्तिस्पर्धा

१. प्रथमपुरस्कार: अमरजीत: वेदव्यासपरिसर:, बलाहर:
१. प्रथमपुरस्कार: सौरभ शर्मा वेदव्यासपरिसर:, बलाहर:
२. द्वितीयपुरस्कार: अभिषेक कुमार: जयपुरपरिसर:, जयपुरम्
२. द्वितीयपुरस्कार: केशव नाथ झा जयपुरपरिसर:, जयपुरम्
२. द्वितीयपुरस्कार: मयोभव पाण्डेय: लखनऊपरिसर:, लखनऊ
२. द्वितीयपुरस्कार: ललित कुमार वार्ष्णेय: लखनऊपरिसर:, लखनऊ
३. तृतीयपुरस्कार: अविनाश भोई सदाशिवपरिसर:, पुरी
३. तृतीयपुरस्कार: सुस्मन्त कुमार द्विवेदी सदाशिवपरिसर:, पुरी
३. तृतीयपुरस्कार: प्रशान्तगांव्कर: राजीवगान्धीपरिसर:, शृङ्गेरी
३. तृतीयपुरस्कार: सुब्राय हेगडे राजीवगान्धीपरिसर:, शृङ्गेरी

### आशुभाषणम्

१. प्रथमपुरस्कार: सुर्यहेब्बार: ए. राजीवगान्धीपरिसर:, शृङ्गेरी
२. द्वितीयपुरस्कार: उमेश कुमार पाण्डेय: जयपुरपरिसर:, जयपुरम्
३. तृतीयपुरस्कार: अविनाश भोई सदाशिवपरिसर:, पुरी

### अनुवादस्पर्धा (हिन्दीत: संस्कृतम्)

१. प्रथमपुरस्कार: योगिता डि.छत्रे राजीवगान्धीपरिसर:, शृङ्गेरी
२. द्वितीयपुरस्कार: रमाकान्तसाहु: सदाशिवपरिसर:, पुरी
३. तृतीयपुरस्कार: उमेश कुमार पाण्डेय: जयपुरपरिसर:, जयपुरम्

### अनुवादस्पर्धा (आङ्ग्लत: संस्कृतम्)

१. प्रथमपुरस्कार: योगिता डि.छत्रे राजीवगान्धीपरिसर:, शृङ्गेरी
२. द्वितीयपुरस्कार: रविन्द्र: जयपुरपरिसर:, जयपुरम्
३. तृतीयपुरस्कार: सोहन आर्य: भोपालपरिसर:, भोपाल:

### गद्यरचना

१. प्रथमपुरस्कार: सूर्यहब्बार: ए. राजीवगान्धीपरिसर:, शृङ्गेरी
२. द्वितीयपुरस्कार: विघ्नेश अय्यर् क.जे.सोमैया मुम्बई-परिसर:
३. तृतीयपुरस्कार: रमाकान्त साहु: सदाशिवपरिपरिसर:, पुरी

### पद्यरचना

१. प्रथमपुरस्कार: सुर्यहेब्बार: ए. राजीवगान्धीपरिसर:, शृङ्गेरी
२. द्वितीयपुरस्कार: हिमांशु गौड़: भोपालपरिसर:, भोपाल:
३. तृतीयपुरस्कार: दीपेन्द्र: श्रीरणवीरपरिसर:, जम्मू

### संस्कृते वार्तालेखनम्

१. प्रथमपुरस्कार: योगिता डि.छत्रे राजीवगान्धीपरिसर:, शृङ्गेरी
२. द्वितीयपुरस्कार: पतंजलि त्रिपाठी लखनऊपरिसर:, लखनऊ
३. तृतीयपुरस्कार: सुभाष कुमार तिवारी भोपालपरिसर:, भोपाल:

### सङ्गणकीय-संस्कृतम्

१. प्रथमपुरस्कार: क्षमा कामत् के. राजीवगान्धीपरिसर:, शृङ्गेरी
२. द्वितीयपुरस्कार: ग्रीष्मा एम्.एस् गुरुवायूर-परिसर:, गुरुवायूरु
३. तृतीयपुरस्कार: गुणनिधि सैपट: जयपुरपरिसर:, जयपुरम्

### अशुचित्रणम्

१. प्रथमपुरस्कार: यज्ञप्रसादत्रिपाठी सदाशिवपरिसर:, पुरी
२. द्वितीयपुरस्कार: प्रसनजित् पति: एकलव्यपरिसर:, अगरतला
३. द्वितीयपुरस्कार: ज्योतिरञ्जन नन्दा क.जे.सोमैया मुम्बई-परिसर:
४. तृतीयपुरस्कार: सुजाता राणि दाश भोपालपरिसर:, भोपाल:

### व्यङ्ग्यचित्रम्

१. प्रथमपुरस्कार: गोवर्धन कुमार: श्रीरणवीरपरिसर:, जम्मू
२. द्वितीयपुरस्कार: आनन्द प्रकाश पाठक: लखनऊपरिसर:, लखनऊ
३. तृतीयपुरस्कार: नवनीतकृष्ण जे राजीवगान्धीपरिसर:, शृङ्गेरी

### प्रचारपत्रकनिर्माणम्

१. प्रथमपुरस्कार: ज्योतिरञ्जन नन्दा क.जे.सोमैया मुम्बई-परिसर:
२. द्वितीयपुरस्कार: नवनीतकृष्ण जे. राजीवगान्धीपरिसर:, शृङ्गेरी
३. तृतीयपुरस्कार: यज्ञप्रसादत्रिपाठी सदाशिवपरिसर:, पुरी

### रङ्गवल्ली

१. प्रथमपुरस्कार: महेश्वरी एच्. राजीवगान्धीपरिसर:, शृङ्गेरी
२. द्वितीयपुरस्कार: सुचिस्मिता नायक: क.जे.सोमैया मुम्बई-परिसर:
२. द्वितीयपुरस्कार: सुमित्रा साहु: वेदव्यासपरिसर:, बलाहर:
३. तृतीयपुरस्कार: सुनयना साहु: भोपालपरिसर:, भोपाल:
३. तृतीयपुरस्कार: प्रियदर्शिनी शतपथी सदाशिवपरिसर:, पुरी

### एकक-संस्कृतगीतम् (बालकानाम्)

१. प्रथमपुरस्कार: शशाङ्कर सि.जि. राजीवगान्धीपरिसर:, शृङ्गेरी
२. द्वितीयपुरस्कार: प्रतीमप्रकाशपाढी सदाशिवपरिसर:, पुरी
३. तृतीयपुरस्कार: श्रीनाथन् के.पि. गुरुवायूरु-परिसर:, गुरुवायूरु

### एकक-संस्कृतगीतम् (बालिकानाम्)

१. प्रथमपुरस्कार: भवानी आर्. कुरंद्वाड् राजीवगान्धीपरिसर:, शृङ्गेरी
२. द्वितीयपुरस्कार: देविकादास् गुरुवायूरु-परिसर:, गुरुवायूरु
३. तृतीयपुरस्कार: संध्या त्रिपाठी लखनऊपरिसर:, लखनऊ

### एकक-शास्त्रीयगानम् (बालकानाम्)

१. प्रथमपुरस्कार: शशाङ्कर सि.जि. राजीवगान्धीपरिसर:, शृङ्गेरी
२. द्वितीयपुरस्कार: श्रीनाथन्के.पि. गुरुवायूरु-परिसर:, गुरुवायूरु
३. तृतीयपुरस्कार: अंकित पाण्डेय: लखनऊपरिसर:, लखनऊ
४. प्रोत्साहनपुरस्कार: भट्ट देवांग: जयपुरपरिसर:, जयपुरम्

### एकक-शास्त्रीयगानम् (बालिकानाम्)

१. प्रथमपुरस्कार: चन्द्रिका वेदव्यासपरिसर:, बलाहर:
२. द्वितीयपुरस्कार: क्षमा कामत् के राजीवगान्धीपरिसर:, शृङ्गेरी
३. तृतीयपुरस्कार: इन्दिरा एन्.बि. गुरुवायूरु-परिसर:, गुरुवायूरु

### समूहगानम्

१. प्रथमपुरस्कार:- श्रीनाथन्के.पि, गोपीकृष्णन्वि.एम्, अरुणिमा टि.वि., आतिरा बाबु, अञ्जु पि.एस्., इन्दिरा एन्.बि., देविकादास्. (गुरुवायूरु-परिसर:, गुरुवायूरु)

युवमहोत्सव:

२. द्वितीयपुरस्कारः - त्रिदला इ.जि, क्षमा कामत् के, रञ्जिता डि.आर्, ग्रीष्मा रै बि., काव्या बि.एम्., रविशङ्कर भट् के. एस्., भवानी आर्. कुरंद्वाड् (राजीवगान्धीपरिसरः, शृङ्गेरी)
३. तृतीयपुरस्कारः - अमरजीतः, हिमान्शुः, वैजयन्ती माला, सोनाली, गौरवः (वेदव्यासपरिसरः, बलाहरः)

### एकक-शास्त्रीयवादनम्

१. प्रथमपुरस्कारः हृषिकेश् टि.एस्. गुरुवायूरु-परिसरः, गुरुवायूरु
२. द्वितीयपुरस्कारः गोपालकृष्ण हङ्गारि राजीवगान्धीपरिसरः, शृङ्गेरी
३. तृतीयपुरस्कारः भास्कर काण्डपालः लखनऊपरिसरः, लखनऊ

### एकक-शास्त्रीयनृत्यम्

१. प्रथमपुरस्कारः दीप्तीश कुमार शतपथी सदाशिवपरिसरः, पुरी
२. द्वितीयपुरस्कारः सुश्री भाग्यश्री श्रीचंदन क.जे.सोमैया मुम्बई-परिसरः
३. तृतीयपुरस्कारः काव्याचन्द्रन् गुरुवायूरु-परिसरः, गुरुवायूरु

### सङ्घनृत्यम् (बालिकानाम्)

१. प्रथमपुरस्कारः - ग्रीष्मा रै. बि., भवानी आर्.कुरंद्वाड्, त्रिदला इ.जि., काव्या बि.एम्., उषा एल्.हेगडे, अहल्या ए.भट् (राजीवगान्धीपरिसरः, शृङ्गेरी)
२. द्वितीयपुरस्कारः - सूर्यगायत्री.पि., प्रतीक्षा के.पि., रेष्मा के., काव्याचन्द्रन्, रेष्मा ए.आर्., मेघा सन्तोष्, (गुरुवायूरु-परिसरः, गुरुवायूरु)
३. तृतीयपुरस्कारः - राखी कलइ, अनन्या गिरि, लिसालिन पट्टनायक, प्रियंका पाल, हीरा बाल्मीकि, मम्पी देबनाथः, एकलव्यपरिसरः, अगरतला

### एकपात्राभिनयः

१. प्रथमपुरस्कारः अहल्या ए.भट् राजीवगान्धीपरिसरः, शृङ्गेरी
२. द्वितीयपुरस्कारः हरिप्रसाद् एस् गुरुवायूरु-परिसरः, गुरुवायूरु
३. तृतीयपुरस्कारः आयुष दीक्षितः भोपालपरिसरः, भोपालः
४. प्रोत्साहनपुरस्कारः प्रियांका शर्मा एकलव्यपरिसरः, अगरतला

### योगासनम् (बालकानाम्)

१. प्रथमपुरस्कारः देबी प्रसाद् साहुः गुरुवायूरु-परिसरः, गुरुवायूरु
२. द्वितीयपुरस्कारः सुनील कुमार मलिकः सदाशिवपरिसरः, पुरी
३. तृतीयपुरस्कारः निशेश तोमरः वेदव्यासपरिसरः, बलाहरः

### योगासनम् (बालिकानाम्)

१. प्रथमपुरस्कारः वैजयन्ती माला वेदव्यासपरिसरः, बलाहरः
२. द्वितीयपुरस्कारः जयश्री बेरा एकलव्यपरिसरः, अगरतला
३. तृतीयपुरस्कारः प्रियन्का थापा क.जे.सोमैया मुम्बई-परिसरः

### १०० मीटरधावनम् (बालकानाम्)

१. प्रथमपुरस्कारः रतीश् मोहनन् गुरुवायूरु-परिसरः, गुरुवायूरु
२. द्वितीयपुरस्कारः दीपक कुमार दाशः भोपालपरिसरः, भोपालः
३. तृतीयपुरस्कारः सौम्यकान्त महापात्रः सदाशिवपरिसरः, पुरी

### २०० मीटरधावनम् (बालकानाम्)

१. प्रथमपुरस्कारः रतीश् मोहनन् गुरुवायूरु-परिसरः, गुरुवायूरु
२. द्वितीयपुरस्कारः श्रीप्रद एम्. जोशी राजीवगान्धीपरिसरः, शृङ्गेरी
३. तृतीयपुरस्कारः सौम्यकान्त महापात्रः सदाशिवपरिसरः, पुरी

### ४०० मीटरधावनम् (बालकानाम्)

१. प्रथमपुरस्कारः तरुण कुमारः वेदव्यासपरिसरः, बलाहरः
२. द्वितीयपुरस्कारः श्रीप्रद एम्. जोशी राजीवगान्धीपरिसरः, शृङ्गेरी
३. तृतीयपुरस्कारः नीलेश शर्मा भोपालपरिसरः, भोपालः

### ८०० मीटरधावनम् (बालकानाम्)

१. प्रथमपुरस्कारः तरुणकुमारः वेदव्यासपरिसरः, बलाहरः
२. द्वितीयपुरस्कारः सल्मान् फारिश् एम्.टि. गुरुवायूरु-परिसरः, गुरुवायूरु
३. तृतीयपुरस्कारः तोतारामः राजीवगान्धीपरिसरः, शृङ्गेरी
४. तृतीयपुरस्कारः सूर्यकान्त चौबे भोपालपरिसरः, भोपालः

### १५०० मीटरधावनम् (बालकानाम्)

१. प्रथमपुरस्कारः तरुण कुमारः वेदव्यासपरिसरः, बलाहरः
२. द्वितीयपुरस्कारः वेङ्कटरमण गणपति हेब्बारः राजीवगान्धीपरिसरः, शृङ्गेरी
३. तृतीयपुरस्कारः समीरदेव चौहान सदाशिवपरिसरः, पुरी
४. तृतीयपुरस्कारः मनीषपन्तः रघुनाथकीर्तिपरिसरः, देवप्रयागः

### १०० मीटरधावनम् (बालिकानाम्)

१. प्रथमपुरस्कारः सावी सिंग् सदाशिवपरिसरः, पुरी
२. द्वितीयपुरस्कारः शोभिता एम् गुरुवायूरु-परिसरः, गुरुवायूरु
३. तृतीयपुरस्कारः ताछलिमा खातुन एकव्यपरिसरः, अगरतला

### २०० मीटरधावनम् (बालिकानाम्)

१. प्रथमपुरस्कारः सावी सिंग् सदाशिवपरिसरः, पुरी
२. द्वितीयपुरस्कारः मनीषा मीणा जयपुरपरिसरः, जयपुरम्
३. तृतीयपुरस्कारः ताछलिमा खातुन एकव्यपरिसरः, अगरतला

### ४०० मीटरधावनम् (बालिकानाम्)

१. प्रथमपुरस्कारः मनीषा मीणा जयपुरपरिसरः, जयपुरम्
२. द्वितीयपुरस्कारः स्वागतिका आचार्यः सदाशिवपरिसरः, पुरी
३. तृतीयपुरस्कारः उर्मिला देवी वेदव्यासपरिसरः, बलाहरः

### दूरकूर्दनम् (बालकानाम्)

१. प्रथमपुरस्कारः अंकित कुमार शर्मा जयपुरपरिसरः, जयपुरम्
२. द्वितीयपुरस्कारः रतीश् मोहनन् गुरुवायूरु-परिसरः, गुरुवायूरु
३. तृतीयपुरस्कारः दीपक शर्मा लखनऊपरिसरः, लखनऊ

### दूरकूर्दनम् (बालिकानाम्)

१. प्रथमपुरस्कारः शिवान्जली वेदव्यासपरिसरः, बलाहरः
२. द्वितीयपुरस्कारः माधुरी मल्लिक भोपालपरिसरः, भोपालः
३. तृतीयपुरस्कारः पूजा शर्मा जयपुरपरिसरः, जयपुरम्

युवमहोत्सवः

### दूरकूर्दनम् ( बालकानाम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | ललित पाराशरः | भोपालपरिसरः, भोपाल |
| २. | द्वितीयपुरस्कारः | अजय कुमार शर्मा | जयपुरपरिसरः, जयपुरम् |
| ३. | तृतीयपुरस्कारः | जीवनज्योति वेहेरा | सदाशिवपरिसरः, पुरी |

### उच्चकूर्दनम् ( बालिकानाम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | काजल शर्मा | वेदव्यासपरिसरः, बलाहरः |
| २. | द्वितीयपुरस्कारः | क्षमा कामत् के. | राजीवगान्धीपरिसरः, शृङ्गेरी |
| ३. | तृतीयपुरस्कारः | नीलू यादवः | जयपुरपरिसरः, जयपुरम् |

### गोलक्षेपणम् ( बालकानाम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | नवदीप कुमारः | वेदव्यासपरिसरः, बलाहरः |
| २. | द्वितीयपुरस्कारः | कमलेश कुमार सैनी | जयपुरपरिसरः, जयपुरम् |
| ३. | तृतीयपुरस्कारः | जयदेव मिश्रः | सदाशिवपरिसरः, पुरी |

### गोलक्षेपणम् ( बालिकानाम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | प्रिया वरियालः | वेदव्यासपरिसरः, बलाहरः |
| २. | द्वितीयपुरस्कारः | संगीता सरकारः | एकलव्यपरिसरः, अगरतला |
| ३. | तृतीयपुरस्कारः | दीक्षा शर्मा | जयपुरपरिसरः, जयपुरम् |

### चक्रक्षेपणम् ( बालकानाम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | पंकजः | वेदव्यासपरिसरः, बलाहरः |
| २. | द्वितीयपुरस्कारः | तासी नग्मगेलः | लखनऊपरिसरः, लखनऊ |
| ३. | तृतीयपुरस्कारः | बासुदेब करः | सदाशिवपरिसरः, पुरी |

### चक्रक्षेपणम् ( बालिकानाम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | प्रिया वरियालः | वेदव्यासपरिसरः, बलाहरः |
| २. | द्वितीयपुरस्कारः | वंदना शर्मा | जयपुरपरिसरः, जयपुरम् |
| ३. | तृतीयपुरस्कारः | विनी शुक्ला | लखनऊपरिसरः, लखनऊ |

### कुन्तक्षेपणम् ( बालकानाम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | विषाल शर्मा | लखनऊपरिसरः, लखनऊ |
| २. | द्वितीयपुरस्कारः | रमेश बि.सि. | राजीवगान्धीपरिसरः, शृङ्गेरी |
| ३. | तृतीयपुरस्कारः | पंकजः | वेदव्यासपरिसरः, बलाहरः |

### बैड्मिण्टन् ( बालकानाम् एककम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | अरविन्द दाशः | सदाशिवपरिसरः, पुरी |
| २. | द्वितीयपुरस्कारः | हितेश शर्मा | वेदव्यासपरिसरः, बलाहरः |

### बैड्मिण्टन् ( बालकानां युगलम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | श्रिपति भट् | राजीवगान्धीपरिसरः, शृङ्गेरी |
| १. | प्रथमपुरस्कारः | किशोर कुमारः | राजीवगान्धीपरिसरः, शृङ्गेरी |
| २. | द्वितीयपुरस्कारः | अन्शुल लवानिया | जयपुरपरिसरः, जयपुरम् |
| ३. | द्वितीयपुरस्कारः | राम मेहरः | जयपुरपरिसरः, जयपुरम् |

### बैड्मिण्टन् ( बालिकानाम् एककम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | शिल्पा शर्मा | वेदव्यासपरिसरः, बलाहरः |
| २. | द्वितीयपुरस्कारः | रितु कुमारी | जयपुरपरिसरः, जयपुरम् |

### बैड्मिण्टन् ( बालिकानां युगलम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | कविता के.ए | गुरुवायूरु-परिसरः, गुरुवायूरु |
| १. | प्रथमपुरस्कारः | सेतुलक्ष्मी पि.एस् | गुरुवायूरु-परिसरः, गुरुवायूरु |
| २. | द्वितीयपुरस्कारः | प्रियन्का महापात्रः | क.जे.सोमैया मुम्बई-परिसरः |
| २. | द्वितीयपुरस्कारः | प्रियन्का थापा | क.जे.सोमैया मुम्बई-परिसरः |

### हस्तकन्दुकस्पर्धा ( बालकानाम् )

१. प्रथमपुरस्कारः - धर्मपद माझी, जितेन्द्र कुमार त्रिपाठी, प्रकाश कुमार नायक, चिन्मय कुमार जेना, गौरीशङ्कर गिरिः, सत्यजित् करः, दीपक कुमार दाशः, विजयकुमार करः, अश्विनी कुमार पण्डा (सदाशिवपरिसरः, पुरी)

२. द्वितीयपुरस्कारः - निरञ्जन भट्टः, सतीश भट्टः, विनयकुमार भाग्वत्, नरेन्द्र भाग्वत्, सुब्राय एच्.जे., राधवेन्द जि.हेगडे, श्रीपति भट्टः, मञ्जुनाथ रमेश भट्टः (राजीवगान्धीपरिसरः, शृङ्गेरी)

### कबड्डी ( बालकानाम् )

१. प्रथमपुरस्कारः - जयदेव मिश्र, सदानन्द त्रिपाठी, गोपालकृष्ण मिश्रः, शिवशङ्कर पाणिग्राही, राजेश कुमार दीक्षितः, गौरीशङ्कर त्रिपाठी, पूर्णचन्द्र दाशः, क्रितिञ्जय विश्वालः, सुनील पाणिग्राही (सदाशिवपरिसरः, पुरी)

२. द्वितीयपुरस्कारः - सनीत गौडः, सुधाकरः, रविशंकर जोषी, दुश्यन्त शर्मा, हरिओम् शर्मा, दिनेश मिश्रः, अनुज शर्मा, विषाल शर्मा, दिव्याशुः, सचिन गोड़ः (लखनऊपरिसरः, लखनऊ)

### खो-खो ( बालिकानाम् )

१. प्रथमपुरस्कारः - शिवान्जली, प्रिया वरियालः, विभा, कालज शर्मा, शिल्पा शर्मा, उर्मिला, मोनिका, सपना, शबनं कुमारी, बन्दना, वैजयन्ती माला, सुरभी, पूजा (वेदव्यासपरिसरः, बलाहरः)

२. द्वितीयपुरस्कारः - संगीता सरकारः, अनिमा बर्मन्, हीरा बाल्मीकिः, ताछलिमा खातुन, सस्मिता दासः, मञ्जु रंखोलः, अंकिता पालः, सुतपा पालः, राखी गोस्वामी, सस्मिता महापात्रः, जयश्री बेरा (एकलव्यपरिसरः, अगरतला)

### चतुरङ्गम् ( बालकानाम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | रविकुमार आर्यः | क.जे.सोमैया मुम्बई-परिसरः |
| २. | द्वितीयपुरस्कारः | राहुल राजौरिया | भोपालपरिसरः, भोपालः |
| ३. | तृतीयपुरस्कारः | दीपज्योतिदेवः | गुरुवायूरु-परिसरः, गुरुवायूरु |

### चतुरङ्गम् ( बालिकानाम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | पुनम जेना | सदाशिवपरिसरः, पुरी |
| २. | द्वितीयपुरस्कारः | दुर्गा श्रीवत्सा | राजीवगान्धीपरिसरः, शृङ्गेरी |
| ३. | तृतीयपुरस्कारः | देवीप्रभा विश्वालः | श्रीरणवीरपरिसरः, जम्मू |








विजयवैजयन्त्या सह राजीवगान्धीपरिसरगणः

सङ्घनृत्यस्य किञ्चन दृश्यम्

### मल्लयुद्धम् ( प्रथमः वर्गः – ५७-किलोग्राम्-पर्यन्तम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | रोशन लालः | जयपुरपरिसरः, जयपुरम् |
| २. | द्वितीयपुरस्कारः | राहुल शर्मा | श्रीरणवीरपरिसरः, जम्मू |
| ३. | तृतीयपुरस्कारः | शशाङ्कः मिश्रः | भोपालपरिसरः, भोपालः |
| ३. | तृतीयपुरस्कारः | गौतम आर्यः | क.जे.सोमैया मुम्बई-परिसरः |

### मल्लयुद्धम् ( द्वितीयः वर्गः – ६१-किलोग्राम्-पर्यन्तम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | सुरेश कुमार जितरवालः | जयपुरपरिसरः, जयपुरम् |
| २. | द्वितीयपुरस्कारः | पूर्णचन्द्र दाशः | सदाशिवपरिसरः, पुरी |
| ३. | तृतीयपुरस्कारः | धर्मेन्द्र सिंहः | वेदव्यासपरिसरः, बलाहरः |
| ३. | तृतीयपुरस्कारः | सचिन गोड्ः | लखनऊपरिसरः, लखनऊ |

### मल्लयुद्धम् ( तृतीयः वर्गः – ६५-किलोग्राम्-पर्यन्तम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | ख्याली रामः | जयपुरपरिसरः, जयपुरम् |
| २. | द्वितीयपुरस्कारः | राजेश कुमार आचार्यः | सदाशिवपरिसरः, पुरी |
| ३. | तृतीयपुरस्कारः | अमरनाथः | वेदव्यासपरिसरः, बलाहरः |

### मल्लयुद्धम् ( चतुर्थः वर्गः – ७०-किलोग्राम्-पर्यन्तम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | अलोक कुमारः | जयपुरपरिसरः, जयपुरम् |
| २. | द्वितीयपुरस्कारः | गोपालकृष्ण मिश्रः | सदाशिवपरिसरः, पुरी |
| ३. | तृतीयपुरस्कारः | अमितः | वेदव्यासपरिसरः, बलाहरः |
| ३. | तृतीयपुरस्कारः | पुरूषोत्तम मिश्रः | भोपालपरिसरः, भोपालः |

### मल्लयुद्धम् ( पञ्चमः वर्गः – ७४-किलोग्राम्-पर्यन्तम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | गौरव पटियालः | वेदव्यासपरिसरः, बलाहरः |
| २. | द्वितीयपुरस्कारः | राजेश व्यासः | जयपुरपरिसरः, जयपुरम् |
| ३. | तृतीयपुरस्कारः | जयवीरः | श्रीरणवीरपरिसरः, जम्मू |
| ३. | तृतीयपुरस्कारः | दिनेश मिश्रः | लखनऊपरिसरः, लखनऊ |

### मल्लयुद्धम् ( षष्ठः वर्गः – ८६-किलोग्राम्-पर्यन्तम् )

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | शुभम् | वेदव्यासपरिसरः, बलाहरः |
| २. | द्वितीयपुरस्कारः | कमलेश कुमार सैनी | जयपुरपरिसरः, जयपुरम् |
| ३. | तृतीयपुरस्कारः | अनिल कुमार मिश्रः | श्रीरणवीरपरिसरः, जम्मू |
| ३. | तृतीयपुरस्कारः | सुदर्शन दीक्षितः | सदाशिवपरिसरः, पुरी |

## ५६ तम्याः अखिलभारतीयशास्त्रीयस्पर्धायाः उद्घोषितविषयाः

- **व्याकरणभाषणम्** (वैयाकरणसिद्धान्तलघुमञ्जूषायाः सुबर्थवादः)
- **साहित्यभाषणम्** (काव्यप्रकाशे ९,१० उल्लासौ)
- **न्यायभाषणम्** (दिनकरीये शब्दखण्डः)
- **साङ्ख्य-योगभाषणम्** (योगदर्शनस्य विभूतिकैवल्यपादौ)
- **मीमांसाभाषणम्** (भाट्टदीपिकायाः चतुर्थाध्यायः)
- **वेदान्तभाषणम्** (ब्रह्मसूत्रशाङ्करभाष्ये द्वितीयाध्यायस्य प्रथमद्वितीयपादौ)
- **धर्मशास्त्रभाषणम्** (निर्णयसिन्धोः द्वितीयपरिच्छेदः)
- **ज्यौतिषभाषणम्** (जातकपारिजातस्य दशफलाध्यायः)
- **जैन-बौद्धदर्शनभाषणम्** (प्रमाणमीमांसा स्वोपज्ञवृत्तिसहितम्)
- **वेदभाष्यभाषणम्** (सायणविरचितस्य ऋग्वेदभाष्यभूमिका)
- **साहित्यशलाकापरीक्षा** (कुवलयानन्दः, आदितः ५० अलङ्काराः)
- **व्याकरणशलाकापरीक्षा** (महाभाष्यस्य पञ्चमषष्ठाह्निके)
- **न्यायशलाकापरीक्षा** (व्युत्पत्तिवादः, प्रथमकारकं यावत्)
- **ज्यौतिषशलाकापरीक्षा** (सूर्यसिद्धान्ते भूगोलाध्यायात् समाप्तिं यावत्)
- **वेदान्तशलाकापरीक्षा** (पञ्चदश्यां प्रथमपञ्चकम्)
- **पुराणेतिहासशलाकापरीक्षा** (वाल्मीकिरामायणे सुन्दरकाण्डे ४९ सर्गादारभ्य ६८ सर्गपर्यन्तम्)
- **मीमांसाशलाकापरीक्षा** (मानमेयोदये प्रमेयपरिच्छेदः)
- **शास्त्रार्थविचारः** (ख्यातिवादः)
- **काव्यकण्ठपाठः** (कुमारसम्भवस्य ६,७,८ सर्गाः)
- **अमरकोषकण्ठपाठः** (सम्पूर्णः अमरकोषः)
- **अष्टाध्यायीकण्ठपाठः** (सम्पूर्णा अष्टाध्यायी)
- **धातुरूपकण्ठपाठः** (निर्दिष्टानां १०० धातूनां दशसु लकारेषु सर्वाणि कर्तरि, कर्मणि/भावे रूपाणि, लटि ण्यन्त-सन्नन्तरूपाणि च।)
- **भगवद्गीताकण्ठपाठः** (सम्पूर्णा भगवद्गीता)
- **समस्यापूर्तिः**
- **अक्षरश्लोकी**
- **शास्त्रीयस्फूर्तिस्पर्धा**

नियमावलीं संस्थानस्य जालपुटे ww.sanskrit.nic.in द्रष्टुं शक्यते।

## संपन्ना ५५तमी अखिलभारतीयशास्त्रीयस्पर्धा



अखिलभारतीयशास्त्रीयस्पर्धायाः उद्घाटनं विदधानः आचार्यः कृष्णमूर्तिशास्त्रिवर्यः

राष्ट्रियसंस्कृतसंस्थानेन अधीतानां शास्त्राणां दृढीकरणार्थं शास्त्ररक्षणार्थं च प्रतिवर्षम् अखिलभारतीयशास्त्रीयस्पर्धा राष्ट्रस्तरे समायोज्यते। ऐषमः ५५तमी अखिलभारतीयशास्त्रीय-स्पर्धा राष्ट्रियसंस्कृतसंस्थानस्य त्रिपुराराज्यस्य अगरतलास्थे एकलव्यपरिसरे २८.१२.२०१६ तः ३१.१२.२०१६ दिनाङ्कं यावत् समायोजिता। कार्यक्रमस्य उद्घाटनं २८.१२.२०१६ दिनाङ्के संपन्नम्। तत्र मुख्यातिथिपदं चैन्नैस्थ-मद्राससंस्कृतमहाविद्यालयस्य प्राचार्यचरः आचार्यः कृष्णमूर्ति-शास्त्रिवर्यः, विशिष्टातिथिपदम् अगरतलास्थ-इक्फाई-विश्वविद्यालयस्य कुलसचिवः डॉ. ए. रङ्गनाथमहाभागः, राष्ट्रियसंस्कृतसंस्थानस्य एकलव्यपरिसरस्य प्राचार्यः प्रो. सर्वनारायणझावर्यः अध्यक्षपदं च व्यभूषयन्।




शलाकापरीक्षायाः किञ्चन दृश्यम्

अखिलभारतीयशास्त्रीयस्पर्धासु राज्यस्तरे चिताः २४ राज्येभ्यः समागताः ३२० अधिकाः प्रतिभागिनः सम्मिलिताः अभूवन्। भाषणस्पर्धा, शलाकापरीक्षा, कण्ठपाठस्पर्धा, शास्त्रार्थविचारः, समस्यापूर्तिः, अक्षरश्लोकी चेत्याहत्य २४स्पर्धाः प्रावर्तन्त। प्रत्येकं स्पर्धासु विजयिनः प्रथम-द्वितीय-तृतीयपुरस्कारेण स्वर्णरजत-कांस्यपदकानि समाप्नुवन्। सर्वस्पर्धासु अधिकान् अङ्कान् अवाप्य कर्णाटकराज्यस्य स्पर्धालुगणः विजयवैजयन्त्या व्यभूषयत्।




समापनसत्रे मञ्चासीनाः अतिथयः

अस्य कार्यक्रमस्य पुरस्कारप्रदानसमारोहः ३१.१२.२०१६ दिनाङ्के संपन्नः। मुख्यातिथिपदं रामकृष्णमिशन्-इत्याख्यायाः संस्थायाः स्वामिनः प्राणेश्वरानन्दमहाभागः विशिष्टातिपदं प्रो. सीतानाथ डे वर्यः अध्यक्षपदं राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिवर्यः च समलमकार्षीत्। एते अतिथयः विजेतृभ्यः पुरस्कारं प्रदाय अन्वगृह्णन्।

### विजयिनां सूची

**व्याकरणभाषणम्**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | कार्तिकः भाग्वत् | वेदविज्ञानशोधसंस्थान, सं.म.पा.चेन्नेनहल्ली, कर्णाटकम् |
| २. | द्वितीयपुरस्कारः | रुद्रावती आर्या | रा.सं.सं., लखनऊपरिसरः, लखनऊ |
| ३. | तृतीयपुरस्कारः | मोहन त्रिपाठी | रा.सं.सं., भोपालपरिसरः, भोपालः |

**साहित्यभाषणम्**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | सूर्यः हेब्बार. ए. | रा.सं.सं., राजीवगान्धी-परिसरः, शृङ्गेरी |
| २. | द्वितीयपुरस्कारः | राखी कुमारी | ज.ना.ब्र. आदर्शसंस्कृत-महाविद्यालयः, लगमा, दरभङ्गा |
| ३. | तृतीयपुरस्कारः | अभिषेक कुमारः | रा.सं.सं., जयपुरपरिसरः, जयपुरम् |

**न्यायभाषणम्**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | वासुदेवः पि.आर्. | म.सं.म.वि., चेन्नै |
| २. | द्वितीयपुरस्कारः | एस् एम् प्रणवः | पूर्णप्रज्ञ.वि.स्ना.स्ना. अध्ययनकेन्द्रम्-बेङ्गलूरू |
| ३. | तृतीयपुरस्कारः | मंगेश मस्के | श्रीविद्यापाठशाला, गोवा |

**साङ्ख्य-योगभाषणम्**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | सीता गोपाल भाग्वत् | रा.सं.सं., राजीवगान्धी-परिसरः, शृङ्गेरी |
| २. | द्वितीयपुरस्कारः | सर्वेश कुमार तिवारी | कृष्णप्रियाश्रमः, बरसाना, मथुरा |
| ३. | तृतीयपुरस्कारः | मस्के महेश झुंबरः | श्रीविद्यापाठशाला, गोवा |

**मीमांसाभाषणम्**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | बल्लालनाथ अ. कुलकर्णी | श्रीवेङ्कटेश्वरवेदविश्व-विद्यालयः, तिरुपतिः |
| २. | द्वितीयपुरस्कारः | साधु धर्मप्रकाशदासः | दर्शनम्-संस्कृत-महाविद्यालयः, गुजरातम् |
| ३. | तृतीयपुरस्कारः | हरिणः के आर् | म.सं.म.वि., चेन्नै |

### वेदान्तभाषणम्

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | कार्तिक शर्मा के. | म.सं.म.वि., चेन्नै |
| २. | द्वितीयपुरस्कारः | महीपतिः एस् जोय्स् | रा.सं.सं., राजीवगान्धी-परिसरः, शृङ्गेरी |
| ३. | तृतीयपुरस्कारः | एस् पि तेजस्वी | राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः |

### धर्मशास्त्रभाषणम्

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | अलोक चन्द्र परिदा | राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः |
| २. | द्वितीयपुरस्कारः | त्रिवेदी कन्दर्पः जयकिशनभाई | वरतन्तुसंस्कृतमहा-विद्यालयः, गुजरातम् |
| ३. | तृतीयपुरस्कारः | इतुस्मिता बिधार | रा.सं.सं., सदाशिवपरिसरः, पुरी |

### ज्यौतिषभाषणम्

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | वादिराजः तन्त्री | श्री म.सि.प्र.स्ना.स्ना. अध्ययनकेन्द्रम्, उडुपिः |
| २. | द्वितीयपुरस्कारः | मनमोहनशर्मा | श्री ला.ब.शा.रा.सं. विद्यापीठम्, नवदेहली |
| ३. | तृतीयपुरस्कारः | भट्ट दिव्येश दिलीपः भाई | वरतन्तुसंस्कृत-महाविद्यालयः, गुजरातम् |

### जैन-बौद्धदर्शनभाषणम्

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | विपाशा जैनः | रा.सं.सं., जयपुरपरिसरः, जयपुरम् |
| २. | द्वितीयपुरस्कारः | गिरिराजः उपाध्यायः | श्री म.सि.प्र.स्ना.स्ना. अध्ययनकेन्द्रम्-उडुपिः |
| ३. | तृतीयपुरस्कारः | रावल प्रणव शिरीष भाई | दर्शनम्, संस्कृतमहा-विद्यालयः, गुजरातम् |

### वेदभाष्यभाषणम्

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | शिवशङ्करहोता | राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः |
| २. | द्वितीयपुरस्कारः | ऐतरेय एल्.बि. भारद्वाजः | पूर्णपज्ञ.वि.स्ना.स्ना. अध्ययनकेन्द्रम्, बेङ्गलुरू |
| ३. | तृतीयपुरस्कारः | जोषी तारक रोहितभाई | दर्शनम्, संस्कृतमहा-विद्यालयः, गुजरातम् |

### साहित्यशलाकापरीक्षा

| | | | |
|---|---|---|---|
| ३. | तृतीयपुरस्कारः | श्रीवल्ली म. हेगडे | श्री म.सि.प्र.स्ना. अध्ययनकेन्द्रम्-उडुपिः |

### व्याकरणशलाकापरीक्षा

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | श्रीगणेशदेवरुभट्टः | वेदविज्ञानशोधसंस्थान सं.म.पा.चेन्नेनहल्ली |
| २. | द्वितीयपुरस्कारः | अङ्कित कुमारः | श्रीभगवानदास आदर्श-सं.महाविद्यालय, हरिद्वारम् |
| ३. | तृतीयपुरस्कारः | कु.भावना | श्रीमद्दयानन्दकन्या-गुरुकुलम्, चोटीपुरा, उ.प्र. |

### न्यायशलाकापरीक्षा

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | के.एस्.कृष्णः | पूर्णप्रज्ञ वि.स्ना.स्ना. अध्ययनकेन्द्रम्, बेङ्गलुरू |
| २. | द्वितीयपुरस्कारः | जोषी तुषार कन्हैयालालः | वरतन्तुसंस्कृतमहा-विद्यालयः, गुजरातम् |

### सिद्धान्तज्योतिषशलाका परीक्षा

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | अंशुल कुमार दुबे | रा.सं.सं., भोपालपरिसरः, भोपालः |
| २. | द्वितीयपुरस्कारः | विघ्नेश अय्यरः | रा.सं.सं., क.जे.सोमैया-संस्कृतविद्यापीठम्, मुम्बई-परिसरः |
| ३. | तृतीयपुरस्कारः | विभा कुमारी | श्री म.सि.प्र.स्ना.स्ना. अध्ययनकेन्द्रम्-उडुपिः |
| १. | प्रथमश्रेणी | सूर्यप्रकाशः | रा.सं.सं., जयपुरपरिसरः, जयपुरम् |
| १. | प्रथमश्रेणी | श्रीनिवासः | राजकुमारीगणेशर्मा आदर्शसंस्कृत महा.विद्या., कोलहन्टापटोरी, दरभङ्गा |

### वेदान्तशलाकापरीक्षा

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | प्रभञ्जन ए. वायि. | पूर्णप्रज्ञ.वि.स्ना.स्ना. अध्ययनकेन्द्रम्, बेङ्गलूरू |

### पुराणेतिहासशलाकापरीक्षा

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | अविनाशः कविः | पूर्णप्रज्ञ.वि.स्ना.स्ना. अध्ययनकेन्द्रम्, बेङ्गलूरू |
| २. | द्वितीयपुरस्कारः | कु. कौशाम्बी | श्रीमद्दयानन्दकन्या-गुरुकुलम्, चोटीपुरा |

### मीमांसाशलाकापरीक्षा

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | मध्वेश भट्टः | पूर्णप्रज्ञ.वि.स्ना.स्ना. अध्ययनकेन्द्रम्, बेङ्गलूरू |
| २. | द्वितीयपुरस्कारः | आर्. श्रीगोपालः | श्रीविद्यापाठशाला, गोवा |

### काव्यकण्ठपाठः

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | गौरव शर्मा | श्रीमातावैष्णोदेवी गुरुकुलम्, कटडा जम्मू |
| २. | द्वितीयपुरस्कारः | चिन्मया सुभाष इनामदार | ज्ञानप्रबोधिनी-संस्कृत पाठशाला, महाराष्ट्रम् |
| ३. | तृतीयपुरस्कारः | कैलाशः | श्रीमद्दयानन्द-आर्ष-ज्योतिर्मठगुरुकुलम्, पौन्धा, देरादूनम् |

| | | | |
|---|---|---|---|
| ४. | विशिष्टश्रेणी | देवव्रत आर्यः | श्रीमद्दयानन्दवेदार्ष-महाविद्यालयः, नवदेहली |
| ४. | विशिष्टश्रेणी | पाठक समीरः जमनादासः | बाबडेश्वरसंस्कृतमहा-विद्यालयः, गुजरातम् |
| ४. | विशिष्टश्रेणी | अपर्णा होळ्ळा | रा.सं.सं., राजीवगान्धी परिसरः, शृङ्गेरी |
| १. | प्रथमश्रेणी | उदित कुमार पण्डा | म.सं.म.वि., चेन्नै |
| १. | प्रथमश्रेणी | प्रलयनन्दी | रामकृष्णमिशन्, विवेकानन्दविश्वविद्यालयः, हावड़ा |

### अमरकोषकण्ठपाठः

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | महेशः चिदम्बर भट्टः | श्री माता.सं.म.पाठशाला-उम्मचगि, कर्णाटकम् |
| २. | द्वितीयपुरस्कारः | हरिशङ्करः | श्रीमद्दयानन्द-आर्ष-ज्योतिर्मठगुरुकुलम्, देहरादूनम् |
| ३. | तृतीयपुरस्कारः | प्रीतमवेरा | रामकृष्णमिशन्, विवेकानन्द-विश्वविद्यालयः, हावड़ा |
| १. | प्रथमश्रेणी | शुभम शर्मा | श्रीमातावैष्णोदेवी गुरुकुलम्, कटडा, जम्मू |

### अष्टाध्यायीकण्ठपाठः

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | मृणालिनीकौशिकः | श्रीभगवान् दासआदर्श-संस्कृतमहाविद्यालयः, हरिद्वारम् |
| २. | द्वितीयपुरस्कारः | ऐश्वर्या | रा.सं.सं., राजीवगान्धी-परिसरः, शृङ्गेरी |
| ३. | तृतीयपुरस्कारः | मनोज कुमार तिवारी | रा.सं.सं., भोपालपरिसरः |
| ४. | विशिष्टश्रेणी | दीपाली आर्या | रा.सं.सं., लखनऊपरिसरः, लखनऊ |
| ४. | विशिष्टश्रेणी | श्रीतेजा नन्दनम् | राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः |
| ४. | विशिष्टश्रेणी | मुकुलः | ओमावास्यम् कुटीर, बवाना दिल्ली |
| ५. | प्रथमश्रेणी | अनिल द्विवेदी | हरियाणासंस्कृतविद्यापीठम्, पल्वलम् |
| ५. | प्रथमश्रेणी | कृष्णचन्द शर्मा | रा.सं.सं., वेदव्यासपरिसरः, बलाहरः |
| ५. | प्रथमश्रेणी | दिव्यज्योति देवशर्मा | श्रीसीतारामवैदिकादर्श-संस्कृतमहाविद्यालयः, कोलकाता |
| ५. | प्रथमश्रेणी | सुरुचि | आ.क.गुरुकुल दयानन्द वाटिका, शिवगंज सिरोही |
| ५. | प्रथमश्रेणी | अनीश शर्मा | श्रीमातावैष्णोदेवी गुरुकुलम्, कटडा, जम्मू |
| ५. | प्रथमश्रेणी | महेता अक्षय हिम्मतभाई | बाबडेश्वरसंस्कृत-महाविद्यालयः, गुजरातम् |
| ५. | प्रथमश्रेणी | राजकुमार आर्यः | गुरुकुल न.वै.विद्यापीठम्, ओडिशा |

### धातुरूपकण्ठपाठः

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | अनमोल उपाध्यायः | रा.सं.सं., भोपालपरिसरः, भोपालः |
| २. | द्वितीयपुरस्कारः | अक्षयकुमार नारायण भट्टः | श्री माता.सं.म. पाठशाला-उम्मचगि, कर्णाटकम् |
| ३. | तृतीयपुरस्कारः | दवे विवेक पंकजभाई | दर्शनम् संस्कृत-महाविद्यालयः, गुजरातम् |
| ४. | विशिष्टश्रेणी | कु.अन्वीक्षा | श्रीमद्दयानन्दकन्या-गुरुकुलम्, चोटीपुरा, उ.प्र. |
| ५. | प्रथमश्रेणी | आशीष बहुखण्डी | श्रीभगवानदास-आदर्श-संस्कृतमहाविद्यालयः, हरिद्वारम् |
| ५. | प्रथमश्रेणी | मालेउके नेउग् | गुरुकुलाश्रमः आमसेना नूआपरा, ओडिशा |
| ५. | प्रथमश्रेणी | अनिल शर्मा | रा.सं.सं., श्रीरणवीरपरिसर, जम्मू |
| ५. | प्रथमश्रेणी | भारतकुमारः | श्रीमद्दयानन्दवेदार्श-महाविद्यालयः, गौतमनगरम्, दिल्ली |
| ५. | प्रथमश्रेणी | कौमुदी नन्दनम् | राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः |

### शास्त्रार्थविचारः

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | उमामहेश्वरः एन् | रा.सं.सं., राजीवगान्धी-परिसरः, शृङ्गेरी |
| २. | द्वितीयपुरस्कारः | प्रज्ञा | रा.सं.सं., भोपालपरिसरः, भोपालः |
| ३. | तृतीयपुरस्कारः | अनमोल शर्मा | रा.सं.सं., श्रीरणवीर-परिसरः, जम्मू |
| ४. | विशिष्टश्रेणी | जितेन्द्रकुमारतिवारी | काशीहिन्दूविश्वविद्यालयः, वाराणसी |
| ४. | विशिष्टश्रेणी | दत्तानुभव टेंग्से | श्रीविद्यापाठशाला, गोवा |
| ४. | विशिष्टश्रेणी | स्कन्द कुमार शर्मा | श्रीविद्यापाठशाला, गोवा |
| ४. | विशिष्टश्रेणी | मण्डिर विरलकुमारः | बाबडेश्वरसंस्कृत-महाविद्यालयः, गुजरातम् |

### समस्यापूर्तिः

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | ठाकर राजेशकुमार गोविंद भाई | वरतन्तुसंस्कृत-महाविद्यलयः, गुजरातम् |
| २. | द्वितीयपुरस्कारः | सूर्यः हेब्बारः ए. | रा.सं.सं., राजीवगान्धी-परिसरः, शृङ्गेरी |
| ३. | तृतीयपुरस्कारः | योगिता डि. छत्रे | रा.सं.सं., राजीवगान्धी-परिसरः, शृङ्गेरी |

### अक्षरश्लोकी

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | योगेश भारद्वाजः | श्रीरुक्मिणीबल्लभवेद-वेदाङ्गसंस्कृतमहाविद्यालयः, बुलन्दशहरः, उ.प्र. |
| २. | द्वितीयपुरस्कारः | हरिहरः ए | म.सं.म.वि., चेन्नै |
| ३. | तृतीयपुरस्कारः | सूर्यः हेब्बारः ए. | रा.सं.सं., राजीवगान्धी-परिसरः, शृङ्गेरी |

### शास्त्रीयस्फूर्तिस्पर्धा

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | किरणभट्टः | राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः |
| १. | प्रथमपुरस्कारः | शिवशङ्करहोता | राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः |
| २. | द्वितीयपुरस्कारः | कृष्णगोपालपात्रः | रामकृष्णमिशन् विवेकानन्दविश्वविद्यालयः, हावड़ा |
| २. | द्वितीयपुरस्कारः | भट्ट जीगर महेशभाई | सोमनाथसंस्कृत-महाविद्यालयः, गुजरातम् |
| २. | द्वितीयपुरस्कारः | पाण्डेय अरुणकुमारः | सोमनाथसंस्कृत-महाविद्यालयः, गुजरातम् |
| २. | द्वितीयपुरस्कारः | सुप्रियगोस्वामी | रामकृष्णमिशन् विवेकानन्दविश्वविद्यालयः, हावड़ा |
| ३. | तृतीयपुरस्कारः | प्रशान्तः गाँव्कर् | रा.सं.सं., राजीवगान्धी-परिसरः, शृङ्गेरी |
| ३. | तृतीयपुरस्कारः | सूर्यः हेब्बारः ए. | रा.सं.सं., राजीवगान्धी-परिसरः, शृङ्गेरी |

## कुलपतिदैनन्दिनी



०२.१०.२०१६ दिनाङ्के श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे समायोजितायां श्रीलालबहादुरशास्त्रि-स्मारकव्याख्यानमालायां विशिष्टव्याख्यानम्।

०७.१०.२०१६ दिनाङ्के सि.सि.आर्.टि मध्ये प्रवृत्ते उपवेशने सदस्यत्वेन उपस्थितिः।

१६.१०.२०१६ दिनाङ्के मणिपुरराज्यस्थे श्रीराधामाधवादर्शसंस्कृतमहाविद्यालये समायोजिते मणिपुरीयनटसंकीर्तन-कार्यक्रमे मुख्यातिथिरूपेण उपस्थितिः।

२१.१०.२०१६ दिनाङ्के उत्तरप्रदेशसंस्कृतसंस्थाने आयोजिते उपवेशने समुपस्थितिः।

२५.१०.२०१६ दिनाङ्के नवदेहल्यां विश्वविद्यालयानुदानायोगस्य वेतनपरिष्करणसमित्याः उपवेशने उपस्थितिः।

०४.११.२०१६ दिनाङ्के गुरूवायुरपरिसरे सभागारस्य शिलान्यासकार्यक्रमे उपस्थितिः।

०४.११.२०१६ दिनाङ्के केरलराज्यस्य त्रिशूरनगरे विद्यामानस्य शारदागुरुकुले प्रवृत्तायां संगोष्ठ्यां मुख्यातिथित्वेन भागग्रहणम्।

०५.११.२०१६ दिनाङ्के केरलराज्यस्थे तन्त्रविद्यापीठे प्रवृत्तायां संगोष्ठ्यां मुख्यातिथित्वेन उपस्थितिः।

११.११.२०१६ दिनाङ्के श्री रघुनाथकीर्तिपरिसरे प्रवृत्ते भवननिर्माणस्य भूमिपूजाकार्यक्रमे उपस्थितिः।

१८.११.२०१६ तः २१.११.२०१६ दिनाङ्कं यावत् एकलव्यपरिसरे प्रवृत्ते युवमहोत्सवे उपस्थितिः।

२५.११.२०१६ दिनाङ्के श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे समायोजितायाम् अभिनवगुप्तराष्ट्रियसंगोष्ठ्याम् उपस्थितिः।

२७.११.२०१६ दिनाङ्के श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे प्रवृत्ते महामहोपाध्यायवाचस्पत्युपाधिप्रदानचयनसमित्याः उपवेशने उपस्थितिः।

०१.१२.२०१६ दिनाङ्के पुणास्थ-वैदिकसंशोधनमण्डलद्वारा समायोजितायां राष्ट्रियसंगोष्ठ्याम् उपस्थितिः।

०२.१२.२०१६ दिनाङ्के कुरुक्षेत्रविश्वविद्यालयस्य गीताशोधकेन्द्रे प्रवृत्ते सम्मेलने उपस्थितिः।

१६.१२.२०१६ दिनाङ्के World Confluence of Humanity, Power & Spirituality इत्याख्ये कार्यक्रमे उपस्थितिः।

२२.१२.२०१६ दिनाङ्के मुम्बईस्थे क.जे. सोमैयापरिसरे प्रवृत्ते दूरस्थशिक्षाप्रशिक्षणकार्यक्रमस्य उद्घाटनसमारोहे उपस्थितिः।

३१.१२.२०१६ दिनाङ्के एकलव्यपरिसरे प्रवृत्तायाम् अखिलभारतीयशास्त्रीयस्पर्धायाम् उपस्थितिः।

# विदुषां कार्यकलापः

**प्रो. प्रभावदेवीचौधरी** – अध्यक्षत्वेन १५.११.२०१६ दिनाङ्कतः १८.११.२०१६ दिनाङ्कं यावत् 'शोधोपकरणशोधप्रस्तावनिर्माणकार्यशालायाः आयोजनम्। अनुसन्धानमार्गदर्शने कमलादेवीसुयालः, अखिलेशकुमारपाण्डेयश्चेत्यभिधानाभ्यां राष्ट्रियसंस्कृतसंस्थानमुख्यालये देहल्यां विद्यावारिधिरित्युपाधिर्लब्धः।

**प्रो. हंसधरझा** – समन्वयकत्वे (Co-Ordinator) भोपालपरिसरे ०६.०९.२०१६ दिनाङ्कतः २२.११.२०१६ दिनाङ्कं यावत् त्रैमासिक-भारतीय-ज्योतिष (फलित) परिचयपाठ्यक्रमस्य तथा च त्रैमासिक-भारतीय-वास्तुशास्त्र-परिचयपाठ्यक्रमस्य सञ्चालनम् अनुष्ठितम्। संयोजकत्वे अक्तूबरमासस्य २५-२६ दिनाङ्कयोः मध्यप्रदेश-छत्तीसगढ-राज्यस्तरीयशास्त्रीय-प्रतियोगिताः समनुष्ठिताः। अक्टूबरमासे सोमनाथसंस्कृतविश्वविद्यालये ज्योतिषशास्त्रे विशिष्टं व्याख्यानं जातम्। एवं राष्ट्रियसंस्कृतविद्यापीठे तिरुपतौ आन्ध्रप्रदेशे व्याख्यानं प्रदत्तम्। नवम्बरमासे उज्जयिन्यां कालिदाससंस्कृतअकादम्यां कालिदास-समारोहावसरे कविसमवाये स्वरचितकाव्यस्य पाठो विहितः। अक्टूबरमासे राष्ट्रियसंस्कृतविद्यापीठे तिरुपतौ आन्ध्रप्रदेशे विद्यावारिधिमौखिकपरीक्षायाम् अध्यक्षत्वेनाहूतः। अक्टूबरमासे छत्तीसगढस्थ-अम्बिका-पुरस्थ-सरगूजाविश्वविद्यालयस्य संस्कृतमहाविद्यालये प्राध्यापकस्य नियुक्तये ज्योतिषविषये विषयविशेषज्ञत्वेनाहूतः।

**डॉ. सनन्दनकुमारत्रिपाठी** – राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरस्य वरिष्ठसहायकाचार्येण डॉ. सनन्दनकुमारत्रिपाठिनोज्जयिनीस्थ-कालिदासंस्कृताकादम्यासमायोजिते कालिदासमहोत्सवे संस्कृतकविसमवाये १३.११.२०१६ तमे दिनाङ्के भारतराष्ट्रगौरवख्यापकः स्वरचितसंस्कृतकाव्यपाठः प्रस्तुतः। संदीपकुमारदुबेइत्यभिधानेन भोपालपरिसरशोधच्छात्रेण मार्गनिर्देशने राष्ट्रियसंस्कृतसंस्थान-मुख्यालये देहल्यां विद्यावारिधिरित्युपाधिर्लब्धः।

**डॉ. श्रीगोविन्दपाण्डेयः** – आयोजनसचिवत्वेन १५.११.२०१६ दिनाङ्कतः १८.११.२०१६ दिनाङ्कं यावत् 'शोधोपकरणशोधप्रस्ताव-निर्माणकार्यशालायाः आयोजनम्।

**डॉ. नीलाभतिवारी** – समन्वयकत्वेन १५.११.२०१६ दिनाङ्कतः १८.११.२०१६ दिनाङ्कं यावत् 'शोधोपकरणशोधप्रस्तावनिर्माणकार्यशालयाः आयोजनम्। संस्कृतशिक्षानुसन्धानसर्वेक्षणम् इति सम्पादितग्रन्थस्य लोकार्पणम्।

**डॉ. संगीतागुन्देचा** – अक्टूबरमासे 'एकान्त का मानचित्र' पुस्तकाय भोपालस्थ-साहित्यसागरद्वारा 'आशा साहित्य सम्मान' इत्यनेन सम्मानिता।

**डॉ. नितिनजैनः** – भारततिब्बतसहयोगमञ्चेन साँचीबौद्ध-भारतीयाध्ययनविश्वविद्यालयेन च आयोजितायाम् अन्ताराष्ट्रियसंगोष्ठ्यां प्रतिभागिता। बरकतउल्लाविश्वविद्यालयस्य शिक्षाविभागेन 'प्राथमिक शिक्षा कल, आज और कल' इति विषयमवलम्ब्य आयोजितराष्ट्रिय-शैक्षिकविचारगोष्ठ्यां सहभागिता। कालिदाससंस्कृत-अकादमीद्वारा संस्कृतगौरवदिवसोपलक्ष्ये आयोजितशोधसंगोष्ठ्यां सहभागिता। साँचीबौद्ध-भारतीयाध्ययनविश्वविद्यालयेन च आयोजितायां चतुर्थधर्मधम्मेति अन्ताराष्ट्रियसंगोष्ठ्यां प्रतिभागिता।

**डॉ. डम्बरूधरपतिः** – समन्वयकत्वे (Co-Ordinator) बरकतउल्लाविश्वविद्यालयस्य शिक्षाविभागस्य सौजन्येन १९.०१.२०१६ दिनाङ्कतः २०.११.२०१६ दिनाङ्कं यावत् 'प्राथमिक शिक्षा कल, आज और कल' इति विषयमवलम्ब्य राष्ट्रीयशैक्षिकविचारगोष्ठ्याः आयोजनम्।

**डॉ. दातारामपाठकः** – भारततिब्बतसहयोगमञ्चेन साँचीबौद्ध-भारतीयाध्ययनविश्वविद्यालयेन च आयोजितायाम् अन्ताराष्ट्रियसंगोष्ठ्यां प्रतिभागिता।

**प्रो. ए.पी. सच्चिदानन्दः** – अक्टोबरमासे संस्कृतभारतीपक्षतः होसनगरे प्रवृत्ते अधिगमशिबिरे उद्घाटकत्वेन भागग्रहणम्। डिसेम्बर ३१ दिनाङ्के शृङ्गेर्यां प्रवृत्ते नादसिरिनामकसङ्गीतकार्यक्रमे अध्यक्षरूपेण भागग्रहणं कृतम्।

**डॉ. वेङ्कटरमण एस्.भट्टः** – २७.११.२०१६ दिनाङ्के श्रीमन्मध्वसिद्धान्तप्रबोधकसंस्कृतस्नातकस्नातकोत्तराध्ययनकेन्द्रे प्रवृत्तकाव्यशास्त्र-विचारपरिषदि 'संस्कृतभाषाध्ययनस्य शास्त्राध्ययनस्य च प्रयोजनानि इति विषये उपन्यासः कृतः। अक्टोबरमासस्य २०, २१ दिनाङ्कयोः श्री.जे.सि.बि.एम् महाविद्यालये प्रवृत्तभाषाविषयकराष्ट्रियकार्यशालयां भागग्रहणं कृतम्। शिरसि नगरस्य गोळी विनायकमन्दिरे नवेम्बरमासे प्रवृत्ते संस्कृतसम्भाषणप्रशिक्षणशिबिरे शिक्षाशास्त्रिणः छात्रान् स्वीकृत्य मार्गदर्शकत्वेन गतः।

**डॉ. चन्द्रकान्तः** – ०३.१२.२०१६ तः ०५.१२.२०१६ पर्यन्तं तथा च १७.१२.२०१६ तः १८.१२.२०१६, राष्ट्रियसंस्कृतविद्यापीठे तिरुपतौ परीक्षकरूपेण भागग्रहणम्। २५.१२.२०१६ भानुवासरे संस्कृतमहाधिवेशनमुपलक्ष्य उडुपिजिल्लायां सञ्चालित १०८ शिबिराभियानस्य समापनसमारोहे मुख्याभ्यागतरूपेण संस्कृतस्योपयोगविषये भाषणं प्रदत्तम्।

**श्री विनय एम्.एम्.** – On 20th and 21st October, Participated in 'National Workshop on Endangered Languages' held at Sri. JCBM College, Sringeri.

**श्री पि. अरविन्द कुमारः** – अक्टोबरमासस्य २०,२१ दिनाङ्कयोः जे.सि.बी.एम्. महाविद्यालये प्रवृत्तायां राष्ट्रियसंगोष्ठ्यां भागग्रहणम्। ०३.१२.२०१६ तः २४.१२.२०१६ पर्यन्तं छात्राध्यापकानाम् अध्यापननिरीक्षणं कृतवान्।

**श्री कु. वेङ्कटेशमूर्तिः** – ०८.१२.२०१६ तः १०.१२.२०१६ पर्यन्तं देहल्यां राष्ट्रियसंस्कृतसंस्थाने अनौपचारिकसंस्कृतशिक्षणस्य केन्द्रीयसमितेः उपवेशने भागगग्रहणं कृतवान्। १५.१२.२०१६ तः २१.१२.२०१६ पर्यन्तं मुम्बय्यां के.जे.सोमैयापरिसरे आयोजितायाम् अ.भा. पाठपरिष्करणकार्यशालायां २२.१२.२०१६ तः २४.१२.२०१६ पर्यन्तं तत्रैव आयोजितायां दूरस्थशिक्षाप्रशिक्षण-कार्यशालायां च भागग्रहणं कृतवान्।

**डॉ. रामकृष्णपेजत्तायः** – २९.११.२०१६ दिनाङ्के दिल्लीस्थ-साहित्याकादम्या श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे आयोजिते परिसंवादे 'संस्कृतसाहित्ये दलितविमर्शः' इत्यस्मिन् विषये पत्रप्रस्तुतिः कृता। २, ३, ४.१२.२०१६ दिनाङ्केषु संस्कृतभारत्या बेङ्गलूरुनगरस्थे अक्षरभवने आयोजितायां प्रयोगानुशीलनकार्यशालायां भागो गृहीतः। २२.१२.२०१६ तः २४.१२.२०१६ पर्यन्तं राष्ट्रियसंस्कृतसंस्थानस्य के.जे. सोमैयापरिसरे प्रवृत्ते दूरस्थशिक्षाप्रशिक्षणे भागो गृहीतः।

**डॉ. राघवेन्द्रभट्टः** – १६.१०.२०१६ तः १८.१०.२०१६ पर्यन्तं मणिपुरराज्यस्थे इम्फालनगरे प्रवृत्ते राष्ट्रियसम्मेलने 'कर्णाटके यक्षगानपरम्परा कृष्णभक्तिश्च' इति विषयकं व्याख्यानम् अदात्। १६.११.२०१६ तमे दिनाङ्के स्वर्णवल्लीमठे प्रवृत्तायां राष्ट्रियसङ्गोष्ठ्यां' महाकाव्यपरम्परा इति विषयकं व्याख्यानं प्रादात्। २, ३, ४.१२.२०१६ दिनाङ्केषु बेङ्गलूरुनगरस्थेऽक्षरे संस्कृतभारत्यां प्रवृत्तायां 'प्रयोगानुशीलनकार्यशालायां भागग्रहणम्। २२.१२.२०१६ तः २४.१२.२०१६ पर्यन्तं राष्ट्रियसंस्कृतसंस्थानस्य के.जे. सोमैया परिसरे प्रवृत्तदूरस्थशिक्षाप्रशिक्षणे भागग्रहणम्।

**प्रो. इन्दिरा. पि.** – राजकीयसंस्कृतकलालयस्य संस्कृतसाहित्यविभागेन २०१६ दिसम्बरमासस्य, १, २ दिनाङ्कयोः आयोजितायां द्विदिवसीयराष्ट्रियसंगोष्ठ्यां सत्राध्यक्षरूपेण भागग्रहणम् अकरोत्। के.के.टि.एम् सर्वकारीयकलालये-संस्कृतविभागेन आयोजित-राष्ट्रियसंगोष्ठ्यां Myths and Classics इति विषयमधिकृत्य ३०.११.२०१६ दिनाङ्के कुञ्चिकाभाषणम् अकरोत्। १०.१२.२०१६ दिनाङ्के श्रीरामसेवासमितिद्वारा आयोजितमण्डलमासीयप्रभाषणकार्यक्रमे 'कठोपनिषत्'-इति विषयमधिकृत्य प्रभाषणं कृतम्। ११.१२.२०१६ तः १२.१२.२०१६ दिनाङ्के कोच्चिन् देवस्वं बोईद्वारा आयोजितप्रभाषणपरम्परायां 'गायत्रीमन्त्रस्य वैशिष्ट्यम्' इति विषयमधिकृत्य प्रभाषणं कृतम्।

**प्रो. सुब्राय.वि भट्टः** – १२.११.२०१६ तः १४.११.२०१६ पर्यन्तं हरिद्वारनगरे समायोजिते अखिलभारतीयप्राच्यविद्यासम्मेलने पण्डितपरिषदि भागं गृहीत्वा मीमांसाशास्त्रे प्रमाणविमर्शः इति विषये शास्त्रार्थः कृतः। १०.१२.२०१६ तः १२.१२.२०१६ पर्यन्तं मैसूरू अवधूत दत्तपीठे समायोजितायां शास्त्रार्थसभायां मीमांसाशास्त्रे वाक्यार्थः कृतः।

**डॉ. प्रमोद भट्टः** – २३.१०.२०१६ तमे दिनाङ्के वेदशास्त्रोत्तेजकसभा पुणे इत्याख्यया संस्थया प्रचालितायां शास्त्रीयपरीक्षायां व्याकरणशास्त्रे 'व्याकरणचूडामणि' इति बिरूदं प्राप्तवान्। वेदशास्त्रोत्तेजकसभा पुणे इत्याख्यया संस्थया प्रचालितायां शास्त्रीयपरीक्षायां 'पुराणेतिहासे' परीक्षकत्वेन २१.१०.२०१६ तमे दिनाङ्के अगमत्। केन्द्रीयविद्यालयीयशिक्षकाणां सेवाकालिकप्रशिक्षणवर्गे २९.१२.२०१६ तमे दिनाङ्के 'संस्कृताभिरुचिवर्धनोपायाः' इत्यस्मिन् विषये प्रशिक्षणार्थिनः बोधितवान्।

**डॉ. मुरलीकृष्णः टि.** – अक्टोबरमासस्य २२-२३ दिनाङ्कयोः शृङ्गेरिस्थे श्रीमठे आयोजितायां लिप्यध्ययनकार्यशालायां भागग्रहणम्। २९.११.२०१६ तः ०१.१२.२०१६ दिनेषु केरलस्य मञ्जेश्वर-उपजिल्लाशालाकलोत्सवः SDPHSS & AUPS, धर्मत्तड्काख्ये स्थाने प्रवृत्तः। तत्र संस्कृतोत्सवस्पर्धासु निर्णायकरूपेण भागग्रहणम्। ०२.१२.२०१६ तः ०४.१२.२०१६ दिनेषु अक्षरम्, संस्कृतभारती, गिरिनगरम्, बेङ्गलूरुनगरे प्रवृत्तायां प्रयोगानुशीलनकार्यशालायां भागग्रहणम्। १५.१२.२०१६ तः २४.१२.२०१६ पर्यन्तं मुक्तस्वाध्यायपीठपक्षतः के.जे. सोमय्याविद्यापीठे प्रवृत्तायां पाठलेखनकार्यशालायां भागग्रहणम्।

**डॉ. वेङ्कटेशताताचार्यः** – १०.१२.२०१६ दिनाङ्के मैसूरुनगरे अवधूतदत्तपीठे भूमाधिकरणमिति विषये वाक्यार्थमकरोत्।

**सु.श्री. सविता आर्या** – अक्टोबरमासे १५, १६ दिनाङ्कयोः शिक्षासंस्कृति-उत्थानन्यासः राष्ट्रियसंस्कृतविद्यापीठम् इति संयुक्तनिर्वहणे तिरूपतौ राष्ट्रस्तरीयभारतीयभाषासम्मेलने भागग्रहणम्। नवम्बरमासे १८ तः २१ पर्यन्तं नवमे युवमहोत्सवे छात्रनिर्देशिकात्वेन भागग्रहणम्। दिसम्बरमासे २, ३, ४ दिनाङ्केषु बेंगलूरू-नगरे अक्षरे 'प्रयोगानुशीलनम्' इति राष्ट्रियकार्यशालायां भागग्रहणम्।

## व्यक्तित्वविकासप्रशिक्षणकार्यक्रमः

नवेम्बर् मासस्य ७ दिनाङ्कतः १७ दिनाङ्कं यावत् राष्ट्रियसंस्कृतसंस्थानस्य पक्षतः संस्थानस्य विविधपरिसराणां कार्यालयीयकर्मचारिणां कृते व्यक्तित्वविकासोद्देशेन 1st In service capacity building training programme एकलव्यपरिसरे आयोजितमासीत्। ७ दिनाङ्के अस्य कार्यक्रमस्य उद्घाटनं समभवत्। संस्थानस्य द्वादशेभ्यः परिसरेभ्यः पञ्चविंशत्यधिककर्मचारिणः अस्य कार्यक्रमस्य प्रयोजनभाजः अभवन्। १७ दिनाङ्के प्रवृत्ते कार्यक्रमस्यास्य समापनसमारोहे राष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः आचार्यपरमेश्वरनारायणशास्त्रिवर्याः अध्यक्षाः आसन्। स्वकीय – अध्यक्षीयभाषणे कार्यक्रमस्य महत्त्वं प्रतिपाद्य व्यक्तित्वविकासे अन्तर्निहितसामर्थ्यस्य विवर्धने एतादृशप्रशिक्षण–कार्यक्रमः अत्यन्तलाभाय कल्पते इत्यवोचन्। प्रशिक्षणकार्यक्रमस्य संयोजकाः डॉ. सि.गिरि महोदयाः, त्रिपुराविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचराः आचार्यसीतानाथदेमहोदयाः आसन्। धर्मशास्त्र–विभागाध्यक्षैः आचार्यखगेश्वरमिश्रवर्यैः स्वागतं व्याहृतम्। प्रतिभागिनः स्वानुभवं प्राकटयन्।



प्रशिक्षणकार्यक्रमस्य एकं दृश्यम्



प्रमाणपत्रं वितरति कुलपतिमहोदयः

## क.जे. सोमैयासंस्कृतविद्यापीठवार्ताः

### एकदिवसीया संस्कृतविज्ञानकार्यशाला

दिनाङ्क ०४.१०.२०१६, शनिवासरे राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य क. जे. सोमैयासंस्कृतविद्यापीठे, संस्कृतशास्त्रेषु विद्यमानवैज्ञानिकसन्दर्भाणामन्वेषणं, प्रायोगिकनिरूपणम्, उपकरणनिर्माणं, संस्कृतविज्ञानपुस्तकनिर्माणञ्च इति प्रकल्पान्तर्गते एकदिवसीय–संस्कृतविज्ञानकार्यशालायाः आयोजनं जातम्। अत्र विशिष्टविद्वान् अपि च मार्गदर्शकः प्रो. चन्द्रगुप्तवर्णेकरः अवर्तत, कार्यक्रमस्य अध्यक्षपदे प्रो. प्रकाशचन्द्रमहोदय आसीत्। कार्यक्रमस्यास्य सञ्चालनं प्रकल्पस्य समन्वयकः डॉ. देवदत्तसरोदे अकरोत्।

### एकतासप्ताहः सतर्कतासप्ताहश्च

परिसरेऽस्मिन् सर्वकारस्य आदेशानुसारं मुख्यालयेन प्राप्तसूचनामाधारीकृत्य सतर्कतासप्ताहः एकतासप्ताहः च ३१.१०.२०१६ दिनाङ्कतः ०६.११.२०१६ पर्यन्तं समाचरितः। एतदङ्गत्वेन छात्राणां कृते भाषणस्पर्धा निबन्धलेखनस्पर्धा च उभयोः कनिष्ठवरिष्ठवर्गयोः पृथक् सञ्चालिता। एकतादिवसे सर्वेऽपि परिसरीयाः शपथं स्वीकृतवन्तः। कार्यक्रमेऽस्मिन् प्रो. प्रकाशचन्द्रः, प्रो. मदनमोहन झाः, प्रो. बोधकुमार झाः, प्रो. ई.एम्. राजन् महोदयश्च उपस्थाय छात्रान् उदबोधयन्। कार्यक्रमस्यास्य मञ्चसञ्चालनं शिक्षाशास्त्रप्राध्यापकः डॉ. विनोदकुमारशर्म्मा अकरोत्। अस्य सम्पूर्णकार्यक्रमस्य संयोजकः श्री शङ्कर आन्धले महोदयः आसीत्।



सतर्कतासप्ताहे प्रमाणपत्रं वितरन्तः अध्यापकाः

### शिक्षादिवसः

राष्ट्रियसंस्कृतसंस्थानस्य क.जे. सोमैयासंस्कृतविद्यापीठे नवेम्बरमासस्य ११ तमे दिनाङ्के सर्वत्र देशे समाचरिष्यमाणशिक्षादिवसमुपलक्ष्य १० दिनाङ्के अपराह्णे ३:०० वादने शिक्षा दिवसः समाचरितः।

अस्मिन् कार्यक्रमे सत्रत्रयम् अवर्तत प्रथमसत्रम् उद्घाटनसत्रम् आसीत् अत्र मुख्यवक्ता श्री वेदवीर I.D.A.S. भारतीयनौकासेनायाः दक्षिणप्रखण्डस्य प्रमुखवित्ताधिकारी, सारस्वतातिथिः प्रो. चन्द्रगुप्तवर्णेकरः प्राचार्यचरः कमीन्स–अभियान्त्रिकीमहाविद्यालयः पुणे, विशिष्टातिथिः प्रो. जयश्री दिलीप साठे, कुलपतिचरी, डेक्कन पी.जी. कालेज पुणे, अध्यक्षः परिसरप्राचार्यः प्रो. सुदेशकुमारशर्ममहोदयः अवर्तत। अस्मिन् सत्रे मुख्यवक्ता श्री वेदवीरमहोदयः भारतीयविज्ञानपरम्परायाः गणितपरम्परायाश्च संक्षिप्तम् ऐतिह्यं प्रस्तूय इतिहासस्य कालक्रमे काल– गणनाविसङ्गतयः कथं सन्ति, ताः भारतीयज्योतिषप्रमाणैः शास्त्रप्रमाणैः च (६६० वर्षाणाम् कालविसङ्गतिं) कथं निवारयितुं शक्यन्ते तत्सविस्तरं न्यगादीत्। परिसरप्राचार्यः कार्यक्रमस्य अस्य अध्यक्षः प्रो. सुदेशकुमारशर्ममहोदयः प्रकल्पमधिकृत्य सम्भाविताः काश्चन समस्याः प्रस्तूय तासां समाधानमपि करणीयमिति अवोचत् किञ्च प्रकल्पं सफलीकर्तुं समेषाम् उभयशास्त्रविदां सहायं भवतु इति कामनां प्राचीकटत्।

कार्यक्रमस्य सञ्चालनं पूर्वाह्णे उद्घाटने सत्रे डॉ. ई. आर्. नारायणन् महोदयः अकार्षीत्। अपराह्णे संवादसत्रे सभासत्रे च कार्यक्रमस्य सञ्चालनं डॉ. देवदत्त सरोदे अकार्षीत्। कार्तज्ञ्यप्रकटनात्परं कार्यक्रमस्य सम्पूर्तिः शान्तिमन्त्रेण अभूत्।

## युवमहोत्सवः

राष्ट्रियसंस्कृतसंस्थानस्य के.जे. सोमैयासंस्कृतविद्यापीठपरिसरेण चिताः छात्राः त्रिपुराराज्यस्य अगरतलास्थे संस्थानस्य एकलव्यपरिसरे १८.११.२०१६ दिनाङ्कतः २१.११.२०१६ पर्यन्तं समायोजिते नवमयुवमहोत्सवे भागग्रहणं कृत्वा ९ पदकानि प्राप्नुवन्निति मोदस्य विषयः। तत्र डॉ. एम्. सुदर्शनचिपलूनकरः, श्री शङ्कर आन्धले, डॉ. विनोदकुमारशर्म्मा, श्रीमती डॉ. सुमनसिंहश्च मार्गदर्शकरूपेण छात्रैः सहागच्छन्।

## वास्तु-ज्योतिषडिप्लोमाकोर्स

परिसरेऽस्मिन् ज्योतिषविभागेन विशेषतया ये ज्योतिषं वास्तुशास्त्रं चाध्येतुमिच्छन्ति तेषां कृते डिप्लोमा इति कक्षाः आरब्धाः। डॉ. आशिषकुमारचौधरी एवं डॉ. अनिरुद्धशुक्ला कक्ष्याः स्वीकुर्वन्ति। तत्र अनेके नामपञ्जीकरणं कारितवन्तः। इमाः कक्ष्याः १२.१२.२०१६ तः आरब्धाः वर्तन्ते।

## मुक्तस्वाध्यायपीठपाठलेखनप्रशिक्षणवर्गः


प्रशिक्षणवर्गस्य उद्घाटनस्य एकं दृश्यम्

मुक्तस्वाध्यायपीठकेन्द्रसमन्वयकानां प्रशिक्षणवर्गः २२.१२.२०१६ तः २४.१२.२०१६ दिनाङ्कं यावत् समभूत्। अस्य उद्घाटनं २२.१२.२०१६ प्रातः १० वादने संस्थानस्य मान्यवराणां कुलपतीनां प्रो. परमेश्वरनारायणशास्त्रिणां करकमलाभ्याम् अभूत्। इमे च विशिष्टातिथि-पदमलङ्कृत्य दूरस्थशिक्षायाः आवश्यकतां महत्त्वं च स्पष्टीकृतवन्तः। अस्मिन् सन्दर्भे विशिष्टव्याख्यानं विधातुमागताः (IGNOU, STRIDE) संस्थायाः आचार्याः सी.आर्.के. मूर्तिमहोदयाः एवम् आचार्याः मधुपरहारमहाभागाश्च मुख्यातिथयः आसन्। प्रशिक्षकरूपेण समागताः शिक्षाशास्त्रिणः प्रो. वाय्.एस्. रमेशमहोदयाः सारस्वतातिथयः आसन्। परिसरप्राचार्याः आचार्याः एस्. के. शर्ममहाशयाः आध्यक्ष्यं निरवहन्। अस्मिन् कार्यक्रमे मुक्तस्वाध्यायपीठस्य निदेशकाः प्रो. रमाकान्तपाण्डेयाः उपस्थिताः। विभिन्नेभ्यः परिसरेभ्यः समागताः विद्वांसः मुक्तस्वाध्यायपीठस्य पाठलेखकाः समन्वयकाश्च भागग्रहणमकुर्वन्। परिसरस्यास्य केन्द्रसमन्वयकः डॉ. देवदत्त-सरोदेमहोदयः कार्यक्रमस्यास्य संयोजको भूत्वा सर्वेभ्यः कार्तज्ञ्यं न्यवेदयत्। अस्य सञ्चालनं साहित्याध्यापकः डॉ. एम्. सुदर्शनचिपलूणकरः अकार्षीत्।

## प्रशिक्षणवर्गसम्पूर्तिकार्यक्रमः



सम्पूर्तिकार्यक्रमे मञ्चासीनः अतिथिगणः

मुक्तस्वाध्यायपीस्य परिसरेऽस्मिन् समायोजितप्रशिक्षणवर्गस्य सम्पूर्तिकार्यक्रमः डिसेम्बरमासस्य २४ दिनाङ्के अपराह्णे ३:०० वादने समभूत्। अस्मिन् कार्यक्रमे मान्याः कुलसचिवाः प्रो. सुब्रह्मण्यशर्माणः विशिष्टातिथिरूपेण समुपस्थाय सर्वान् प्राचोदयन्। अस्मिन् सन्दर्भे मुख्यातिथिरूपेण सोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रो. अर्कनाथ-चौधरीमहाशयाः, विशिष्टव्याख्यानं विधातुमागताः (IGNOU, STRIDE) संस्थायाः आचार्याः सी. आर्. के. मूर्तिमहोदयाः, एवम् आचार्याः मधुपरहारमहाभागाः प्रशिक्षकरूपेण समागताः शिक्षाशास्त्रिणः प्रो. वाय्. एस्. रमेशमहोदयाश्च उपस्थिता आसन्। परिसरप्राचार्याः आचार्याः एस्. के. शर्ममहाशयाः आध्यक्ष्यं निरवहन्। अस्मिन् कार्यक्रमे मुक्तस्वाध्यायपीठस्य निदेशकाः प्रो. रमाकान्तपाण्डेयाः सर्वेभ्यः धन्यवादान् प्राचीकटन्। विभिन्नेभ्यः परिसरेभ्यः समागताः विद्वांसः मुक्तस्वाध्यायपीठस्य पाठलेखकाः समन्वयकाश्च भागग्रहणं कृत्वा प्रमाणपत्रं स्वीकृतवन्तः। परिसरस्यास्य केन्द्रसमन्वयकः डॉ. देवदत्तसरोदेमहोदयः कार्यक्रमस्यास्य संजोजको भूत्वा सर्वेषां स्वागतमकरोत्। अस्य सञ्चालनं शिक्षाशास्त्राध्यापकः डॉ. कुमारः अकार्षीत्।

## भोपालपरिसरवार्ताः

### राज्यस्तरीयशास्त्रीयस्पर्धानाम् आयोजनम्



राज्यस्तरीयस्पर्धायां भाषमाणः छात्रः

भोपालपरिसरे अक्टूबरमासस्य २५ तः २६ पर्यन्तं राज्यस्तरीयशास्त्रीयस्पर्धानाम् आयोजनमभवत्। स्पर्धासु मध्यप्रदेशस्य छत्तीसगढ़स्य च छात्र-छात्राभिः सहभागिता कृता। उद्घाटनकार्यक्रमः २५.१०.२०१६ दिनाङ्के प्रातः भवभूतिप्रेक्षागारे आयोजितः। मुख्यातिथिः श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य प्रो. जयकान्तसिंहः, विशिष्टातिथिः राष्ट्रियसंस्कृत-संस्थानस्य लखनऊपरिसरतः प्रो. मदनमोहनपाठकश्च आस्ताम्। कार्यक्रमस्यास्य अध्यक्षता परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरेण विहिता। एतासु स्पर्धासु व्याकरण-न्याय-मीमांसा-सांख्ययोगादिविषयाः निर्धारिताः। स्पर्धासु कण्ठपाठ-अक्षरश्लोकशास्त्रीयप्रश्नमाञ्चादयः आयोजिताः। मध्यप्रदेशस्य भोपाल-इंदौर-होशंगाबादेभ्यः, छत्तीसगढ़स्य सामरवाल-श्रीकोटाभ्यां च छात्राः प्रतिभागिरूपेण समागताः।

### सतर्कता-जागरूकता-सप्ताहः, राष्ट्रियैकतासप्ताहश्च



सतर्कताजागरूकताशपथं स्वीकुर्वाणाः परिसरसदस्याः

भोपालपरिसरे ३१.१०.२०१६ तः ०५.११.२०१६ पर्यन्तं सतर्कता-जागरूकता- सप्ताहः, ३१.१०.२०१६ तः ०६.११.२०१६ पर्यन्तं राष्ट्रियैकतासप्ताहश्च आयोजितौ। उद्घाटनसमारोहस्य अवसरे परिसरप्राचार्येण प्रो. एम्. चन्द्रशेखरेण परिसरपरिवारस्य छात्राः, प्राध्यापकाः, कर्मचारिणश्च सतर्कता-जागरूकतायाः शपथग्रहणाय आहूताः, अनन्तरमेव राष्ट्रियैकतायाः शपथग्रहणमपि आचरितम्। सप्ताहेऽस्मिन् अनेकविधाः स्पर्धाः आयोजिताः। कर्मचारिभ्यः विशेषरूपेण निबन्धप्रतियोगिता, विद्यार्थिभ्यश्च निबन्ध-पोस्टर-निर्माणप्रतियोगिते च आयोजिताः। प्राचार्येण प्रदत्तसंदेशे भारतदेशस्य एकतायाः अखण्डतायाः च भावनायाः सञ्चारः जातः।

### विश्वविद्यालयानुदानायोगपुनरीक्षणसमित्या पर्यवेक्षणम्



विश्वविद्यालयानुदानायोगपुनरीक्षणसमितेः पर्यवेक्षणस्य एकं दृश्यम्

नवम्बरमासस्य ०४ दिनाङ्कतः ०६ दिनाङ्कपर्यन्तं पुनरीक्षणसमित्या भोपालपरिसरस्य पर्यवेक्षणं विहितम्। त्रिदिवसात्मके अस्मिन् कार्यक्रमे परिसरस्य बहुविध-समुपलब्धानि भौतिकसंसाधनानि, मानवसंसाधनानि च पर्यवेक्षितानि। प्रथमदिवसे परिसरेण प्रतिवेदनस्य प्रस्तुतीकरणं कृतम्, पुनश्च विद्यार्थिभिः प्राध्यापकैश्च सह अन्तःक्रिया जाता। द्वितीयदिवसे मुख्यतः भौतिकसंसाधनानां पर्यवेक्षणकृतम्, सायंकाले 'हास्यचूडामणि' प्रहसनस्य पुनरीक्षण-समितिसमक्षे मञ्चनमभवत्। तृतीयदिवसे छात्रावासादयः सुविधाः पर्यवेक्षिताः।

### शोधोपकरण-शोधप्रस्तावनिर्माणकार्यशाला



कार्यशालायां सम्बोधयन् प्राचार्यः

परिसरस्य शिक्षाशास्त्रविभागेन चतुर्दिवसीयायाः शोधोपकरण-शोधप्रस्तावनिर्माण-कार्यशालायाः दिनाङ्कः १५.११.२०१६ तः १८.११.२०१६ पर्यन्तम् आयोजना कृता। कार्यशालायाः प्रथमदिवसे भोपालस्थस्य क्षेत्रीयशिक्षासंस्थानस्य प्राचार्येण प्रो. नित्यानन्दप्रधानवर्येण शोधाभिकल्पः इति विषये व्याख्यानं प्रदत्तम्। द्वितीयदिवसे श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत-विद्यापीठस्य शिक्षाशास्त्रस्य प्रो. रचनावर्ममहोदयेन शोधोपकरणनिर्माणप्रक्रिया सुविवेचिता। तृतीयदिवसे क्षेत्रीयशिक्षासंस्थानस्य शिक्षाविभागस्य प्रो. रत्नमालार्येण मार्मिकमुद्बोधनं प्रदत्तम्। कार्यशालायां ६० प्रतिभागिनः लाभान्विताः। कार्यशालायाः समापनसमारोहे अध्यक्षः प्रभारी प्राचार्यः प्रो. भारतभूषणमिश्रः, मुख्यातिथिः राष्ट्रिय-अध्यापकशिक्षापरिषदः क्षेत्रीय-निदेशकः डॉ. अवेधशनायकश्च आस्ताम्। प्रो. जे. भानुमूर्तिना स्वागतभाषणम्, प्रो. प्रभादेवीचौधरीद्वारा धन्यवादसमर्पणञ्च प्रदत्ते। कार्यशालासमन्वयकेन डॉ. नीलाभतिवारिणा प्रतिवेदनं प्रस्तुतम्। डॉ. श्रीगोविन्दपाण्डेयः उद्घाटनसमारोहस्य सञ्चालनम्, डॉ. सोमनाथसाहुश्चसमापनसत्रस्य सञ्चालनं विहितवन्तौ।

## ज्योतिष-वास्तुपरिचयपाठ्यक्रमकक्षाः

सितम्बरमासतः विगतत्रिमासेभ्यः समायोजितानां ज्योतिष-वास्तुपरिचयपाठ्य- क्रमकक्षाणां समापनसमारोहस्य आयोजनं २२.११.२०१६, दिनाङ्कस्य सायंकाले चतुर्वादने अनुष्ठितम्। भोपालनगरस्य विभिन्नायुर्वर्गाः इह प्रतिभागिनः आसन्। समारोहेऽस्मिन् अध्यक्षः प्रो. भारतभूषणमिश्रः, मुख्यातिथिः सेवानिवृत्तसेनाधिकारी श्रीभारतभूषणवत्सः, विशिष्टातिथिः प्रो. सुबोधशर्मा, सारस्वतातिथिः डॉ. धर्मेन्द्रसिंहदेवश्च समुपस्थिताः। अनुभवज्ञापनावासरे प्रशिक्षणार्थिभिः महत्त्वपूर्णाः हृदयोद्गाराः अभिव्यक्ताः। पाठ्यक्रमाणां समन्वयकेन प्रो. हंसधरझावर्येण आगमिप्रशिक्षणकार्यक्रमस्य सूचनानि प्रदत्तानि। कार्यक्रमस्य सफलसञ्चालनं डॉ. भूपेन्द्रपाण्डेयमहोदयेन कृतम्।

## संविधानदिवसस्य आयोजनम्

भोपालपरिसरे २५.११.२०१६ तमे दिनाङ्के संविधानदिवसस्य आयोजनमभवत्। कार्यक्रमेऽस्मिन् छात्राणां प्राध्यापकानां कर्मचारिणांच समक्षे संविधानस्य उद्देशिकायाः, अनुच्छेद ५१ अ इत्यस्मिन् वर्णितानां मूलकर्तव्यानां वाचनं जातम्। 'हमारा संविधान' विषयमवलब्य निबन्धप्रतियोगिता आयोजिता। अस्यां स्पर्धायां प्राक्शास्त्रि-शास्त्रिकक्षाणां विद्यार्थिनः सहभागिता प्राप्ता। कार्यक्रमेऽस्मिन् परिसरप्राचार्येण प्रो. एम्. चन्द्रशेखरेण आत्मसंदेशे स्वकर्तव्यानामभिप्रेरणात्मकपरिचयः प्रदत्तः।

## श्रीद्वारकाप्रसादकुशवाहस्य सौप्रस्थानिकसमारोहः

अक्टूबरमासस्य नवमदिनाङ्के श्रीद्वारकाप्रसादकुशवाहमहावर्यस्य सौप्रस्थानिककार्यक्रमः समायोजितः। समुपस्थितप्राध्यापकैः कुशवाहमहोदयस्य भाविजीवनाय उत्तमशुभकामनाः प्रार्थिताः। कार्यक्रमस्यास्य आध्यक्ष्यं प्रो. एम्. चन्द्रशेखरमहोदयैः कृतम्।

# श्रीसदाशिवपरिसरवार्ताः

## मादकनिवारणाभियानम्

नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य आदेशानुसारं पुरीस्थे श्रीसदाशिवपरिसरे २४.१०.२०१६ दिनाङ्के मादकद्रव्यनिवारणाभियानमुपलक्ष्य विविधाः कार्यक्रमाः परिचालिताः। जनजागरणार्थं छात्राणां पदयात्रा, विशिष्टव्याख्यानादयः कार्यक्रमाः आयोजिताः। तत्र शिक्षाशास्त्रविभागाध्यक्षाः आचार्याः डॉ. विजयपालकच्छवाहमहोदयाः मादकद्रव्याणां दुष्परिणामतः राष्ट्रियाधोगतिः भवतीति छात्रान् समुदबोधयन्। अतः राष्ट्रस्य निर्माणे मादकद्रव्यस्य निवारणाभियाने च छात्राणां भूमिका महती वर्तते इति प्रत्यपादयन्। परिसरस्य प्राचार्याः आध्यक्ष्यं निरवहन् छात्राणां मार्गदर्शनं च कृतवन्तः। अध्यापकाँश्च परामृष्टवन्त। तेषाम् ओजःपूर्णभाषणेन उत्तमसमाजस्य परिकल्पाना छात्राणां मनसि प्रभावमजनयत्। कार्यक्रमस्य सञ्चालनं शिक्षाशास्त्रविभागस्याध्यापकाः डॉ रमाकान्तमिश्रमहोदयाः अकुर्वन्। डॉ. पद्ममित्रश्रीनिवास-महोदयश्च सर्वेभ्यः कार्तज्ञ्यं विन्यवेदयत्।

## सर्तकतासप्ताहपालनम्

भारतकेन्द्रसर्वकारस्यादेशेन ३१.१०.२०१६ दिनाङ्कतः ०५.११.२०१६ यावत् पुरीस्थे श्रीसदाशिवपरिसरे सतर्कतासप्ताहः परिपालितः। तत्र परिसरस्य प्राचार्याः डॉ. अतुलकुमारनन्दमहाभागाः परिसरस्य सर्वान् अध्यापकान्, कर्मचारिणः, छात्रांश्च प्रतिज्ञापत्रपाठनपूर्वकं शपथं कारितवन्तः। येन सर्वेऽपि जनाः उत्कोचादि-वञ्चनोपायं परित्यज्य स्वच्छ-शुद्धरूपेण स्वकर्त्तव्यं परिपालयेयुः। राष्ट्रस्य उन्नतये च सर्वे प्रयत्नशीलाः भवेयुः इति।

## एकतासप्ताहपालनम्

०४.११.२०१६ दिनाङ्के सरदारबल्लभभाईपटेलमहोदयस्य जन्मदिवसमुपलक्ष्य संस्थानस्य आदेशानुसारं राष्ट्रिय-एकतासप्ताहः परिपालितः। तत्र सप्ताहमुपलक्ष्य भाषण, निबन्ध-घोषवाक्यादिप्रतियोगिताः आयोजिताः। तत्र विजयिनः छात्राः पुरस्कृताः अभवन्। उत्सवेऽस्मिन् अवसरं प्राप्य आरक्षी अधीक्षकः श्रीसारङ्गधररायगुरुः मुख्यातिथिरूपेण भागमगृह्णात्। अवसरेऽस्मिन् पुरीनगरस्य विशिष्टस्वाधीनतासंग्रामिवर्याणां श्रीचन्द्रशेखरनायकमहोदयानां सम्माननं जातम्। प्राचार्याः डॉ. अतुलकुमारनन्दमहोदया आध्यक्षं निरवहन्। डॉ. सूर्यमणिरथमहोदयाः कार्यक्रमस्य संयोजका आसन्। अन्ते परिसरस्य छात्रैः 'वृक्षाः अस्माकं जीवनम्' इति लघुनाटकम् अभिनीतम्।

## राष्ट्रियशिक्षादिवसः

प्रतिवर्षमिव नवम्बरमासस्य १९ दिनाङ्के राष्ट्रियशिक्षादिवसः श्रीसदाशिवपरिसरे परिपालितः। तत्र मुख्यातिथिरूपेण कटकस्य-केन्द्रीयहिन्दीसंस्थानस्य निदेशकाः, प्रो. लक्ष्मीधर-दाशमहोदयाः मुख्यातिथित्वेन समपुस्थाय शिक्षायाः महदुद्देश्यं प्रकटितवन्तः। मुख्यवक्तृरूपेण परिसरस्यास्य व्याकरणविभागाध्यक्ष्याः आचार्याः डॉ. हरेकृष्णमहापात्रमहोदयाः शिक्षादिवसस्य आवश्यकताविषये सम्यक्

मार्गदर्शनं कृतवन्तः। किं च परिसरस्य प्राचार्याः आचार्याः डॉ. अतुलकुमारनन्दमहाभागाः आध्यक्ष्यं निरूह्य शिक्षा मानवजीवनस्य अत्यन्तमूल्यात्मिका भित्तिः इति प्रास्तुवन्। अस्य कार्यक्रमस्य संयोजकाः शिक्षाशास्त्रविभागस्य अध्यापकाः डॉ. वृन्दावनपात्रमहोदयाः आसन्। विभागाध्यक्षाः आचार्याः विजयपालकच्छवाहमहोदयः सर्वेभ्यः स्वागतं व्याहरन्। कौशलेशशर्ममहोदयः धन्यवादं व्यज्ञापयत्। ओमनारायण-मिश्रश्च सभां समचालयत्। निबन्ध-भाषण-वादविवादादिविविधाः प्रतियोगिताः अभवन्। तत्र पुरस्कृताः छात्रा सभाजिताः अभवन्।

### नवमयुवमहोत्सवे श्रीसदाशिवपरिसरस्य साफल्यम्

त्रिपुराराज्यस्य राजधान्याममगरतालायां विद्यमाने राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य एकलव्यपरिसरे १८.११.२०१६ दिनाङ्कतः २१.११.२०१६ दिनाङ्कं यावत् आयोजिते नवमान्तःपरीसरीययुवमहोत्सवे श्रीसदाशिवपरिसरस्य छात्राः सोत्साहं भागमूद्वा अभूतपूर्वं साफल्यमवाप्नुवन्। तत्र डॉ. सुशान्तराज-डॉ. भगवानसमान्तराय-श्रीमान्प्रियजित्-महापात्र-डॉ. विकासिनीगुमानसिंह-श्रीमान्कण्ठनारायण-दासमहोदयानां मार्गदर्शने परिसरीयच्छात्राः पुरस्कारान् प्राप्तवन्तः।

## वेदव्यासपरिसरवार्ताः

### राज्यस्तरीयशास्त्रीयभाषणस्पर्धाः



राज्यस्तरीयस्पर्धायाः एकं दृश्यम्

अखिलभारतीयसंस्कृतशास्त्रीयभाषणप्रतिस्पर्धासु हिमाचलप्रदेशस्य प्रतिनिधिसमूहस्य चयनार्थं वेदव्यासपरिसरेण राज्यस्तरीयशास्त्रीयभाषणस्पर्धाः समायोजिषत। तत्र हिमाचलप्रदेशस्य नैकेभ्यः महविद्यालयेभ्यः शास्त्राध्ययनरताः कुशलाः छात्राः चत्वारिंशदधिकाः भागमगृह्णन्। ०१.१२.२०१६ दिनाङ्कस्य पूर्वाह्णे इमाः स्पर्धाः समुद्घाटनकार्यक्रमेण समारब्धाः आसन्। कार्यक्रमस्यास्य मुख्यातिथिः जयपुरपरिसरस्य ज्योतिषविभागाध्यक्षः प्रो. ईश्वरभट्टमहोदयः, विशिष्टातिथिः श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य दर्शनविभागस्य सहाचार्यः डॉ. प्रभाकरप्रसादवर्यः, सारस्वतातिथिः श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य साहित्यविभागस्य सहायकाचार्यः, डॉ. सुमनकुमारझावर्यश्चासन्। आध्यक्षं परिसरस्य प्रभारिप्राचार्यः प्रो.रञ्जितकुमारबर्मन्महोदयः निरवहत्। ०२.१२.२०१६ दिनाङ्कस्य अपराह्णे समापनसमारोहः कार्यक्रमः सुसम्पन्नः। कार्यक्रमस्यास्य मुख्यातिथिः जयपुरपरिसरस्य व्याकरणविभागाध्यक्षः प्रो. शिवाकान्तझावर्यः आसीत्। समापनसत्रस्य आध्यक्ष्यं परिसरप्राचार्येण प्रो.लक्ष्मीनिवासपाण्डेयवर्येण निर्व्यूढम्। कार्यक्रमस्यान्ते विजेतारः प्रमाणपत्रेण पुरस्कृताः।

### व्याकरणशास्त्रीयराष्ट्रियसङ्गोष्ठी विशिष्टव्याख्यानञ्च

"व्याकरणाशास्त्रे शब्दतत्त्वम्" इति विषये वेदव्यासपरिसरेण व्याकरणशास्त्रीयराष्ट्रियसङ्गोष्ठी विशिष्टव्याख्यानञ्च २१.१०.२०१६ दिनाङ्के समायोजिषाताम्। २१.१०.२०१६ दिनाङ्के पूर्वाह्णे उद्घाटनसत्रस्य मुख्यातिथिः मुम्बईपरिसरस्य व्याकरणविभागाध्यक्षः प्रो.प्रकाशचन्द्रवर्यः, सारस्वतातिथिः लखनऊपरिसरस्य व्याकरणविभागध्यक्षः प्रो.भरतभूषणत्रिपाठिवर्यः, अध्यक्षः परिसरप्राचार्यश्चासन्। तदनु प्रो.प्रकाशचन्द्रवर्यस्य विशिष्टव्याख्यानकार्यक्रमः सुसम्पन्नः। ततः राष्ट्रस्य नानाभागेभ्यः समागतानां वैयाकरणानां गवेषणपूर्णशोधपत्राणि प्रस्तुतानि। सायंकालिके समापनसत्रे मुख्यातिथिः लखनऊपरिसरस्य व्याकरणविभागध्यक्षः प्रो.भरतभूषणत्रिपाठिवर्यः विशिष्टातिथिः, निवृत्तोपशिक्षानिदेशकः श्रीगुलेरियावर्यः, सारस्वताथिः प्रो. प्रकाशचन्द्रवर्यश्चासन्। कार्यक्रमस्यान्ते पत्रप्रस्तोतृभ्यः प्रमाणपत्रवितरणम् अतिथिभिः व्याकरण-विभागाध्यक्षेण डॉ.अशोचन्द्रगौडशास्त्रिमहोदयेन चाकारि। सङ्गोष्ठ्याः अस्याः संयोजकः डॉ.ब्रजभूषणओझावर्यः आसीत्।

### संस्थानस्य शैक्षिकाङ्किकनिरीक्षणं सुसम्पन्नम् ( Academic Audit )



निरीक्षणं विदधानाः समितिसदस्याः

ऐदं प्राथम्येन संस्थानस्य परसरीयं शैक्षिकाङ्किकनिरीक्षणं १९.१०.२०१६ दिनाङ्के सुसम्पन्नम्। निरीक्षणेऽस्मिन् आन्तरिकनिरीक्षकरूपेण संस्थानस्य रणवीरपरिसरस्य प्राचार्याः आचार्याः रा.देवनाथमहोदयाः, मुम्बईपरिसरस्य प्राचार्याः प्रो. सुदेशशर्मवर्याः, बाह्यनिरीक्षकरूपेण उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतिचराः, गुरुकुलकांगडीविश्वविद्यालयस्य संस्कृत-विभागाध्यक्षाः प्रो.महावीर अगरवालमहोदयश्च परिसरस्य शैक्षिकगतिविधीनाम् अध्ययनवातावरणं निरीक्ष्य मार्गदर्शनञ्चाकुर्वन्। निरीक्षणस्याङ्गतया शिक्षकगोष्ठी समायोजिता। तत्र निरीक्षकाः परिसरीयाध्यापकानां शिक्षणसम्बद्धविभिन्नसूचनाः स्वीकृतवन्तः तदनुशिक्षकाणां मार्गदर्शनमकुर्वन् निरीक्षकाः।

परिसरवार्ता

## लखनऊपरिसरवार्ता:



अधिमञ्चं विराजमानाः अतिथयः

### राज्यस्तरीयशास्त्रीयस्पर्धा:

अखिलभारतीय-शास्त्रीयस्पर्धाचयनप्रक्रियायै राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरेण अक्टूबरमासस्य पञ्चविंशतिदिनाङ्कत: षड्विंशतिदिनाङ्कं यावत् (२५.१०.२०१६-२६.१०.२०१६) राज्यस्तरीयशास्त्रीयस्पर्धा: समायोजिता:। तत्र उत्तरप्रदेशस्य विविधेभ्य: जनपदेभ्य: चिता: प्रतिभागिन: प्रतिभागं कृतवन्त:। कार्यक्रमस्योद्घाटनं सरस्वतीमातु: अर्चनया जातम्। कार्यक्रमस्य अध्यक्षतां कृतवन्त: परिसरप्राचार्या: प्रो.सुरेन्द्रपाठकवर्य्या:। संचालनं प्रो. भारतभूषणत्रिपाठिवर्य्या: अकुर्वन्। स्पर्धाया: सञ्चालनकार्यमकरोत् व्याकरणविभागीय प्राध्यापक: डॉ. यदुवीरस्वरूपब्रह्मचारी। कार्यक्रमेऽस्मिन् निर्णायकरूपेण प्रो.सच्चिदानन्दमिश्र-वर्य्या: (आचार्य:, काशीहिन्दूविश्वविद्यालय:), प्रो.रामकृपालत्रिपाठिमहोदय: (प्राचार्य:, श्रीरंगलक्ष्मीसंस्कृतमहाविद्यालय:), प्रो. रामसलाही-द्विवेदिमहोदय: (व्याकरणाचार्य:, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालय:) उपातिष्ठन्। एते प्रतिभागिनां निरीक्षणं कृत्वा चयनमकुर्वन्।

स्पर्धाया: अस्या: समापनकार्यक्रमे प्राचार्याणां सुरेन्द्रपाठकानाम् आध्यक्षे सञ्चालनकार्यं डॉ.यदुवीरस्वरूपब्रह्मचारिणा कृतम्। धन्यवादज्ञापनं व्याकरणविभागीयप्राध्यापकेन श्री प्रमोदशुक्लेन कृतम्।


वृक्षारोपणस्य एकं दृश्यम्

### वृक्षारोपणकार्यक्रम:

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरेण वृक्षारोपणकार्यक्रमस्यायोजनं कृतम्। राज्यस्तरीयशास्त्रिस्पर्धायां प्रतिभागं कर्तुं समागतानां सर्वेषां प्रतिभागिनां परिसरीयच्छात्राणां च उपस्थितौ वृक्षारोपणं परिसरप्राचार्यस्य प्रो.सुरेन्द्रपाठकमहोदयस्य निर्देशने सर्वै: प्राध्यापकै: विहितम्। कार्यक्रमेऽस्मिन् समागता: अन्ये वरिष्ठा: अपि सहभागम् अकुर्वन्।

### राष्ट्रिय-एकता-दिवस:

राष्ट्रिय-एकता-दिवसस्य एवं सतर्कतासप्ताहस्य च उद्घाटनम् अक्टूबरमासस्य ३१ दिनाङ्के सरस्वत्या: मालार्पणेन मङ्गलाचरणेन च जातम्। मुख्यातिथिरूपेण आसीत् वेदव्यासपरिसरस्य प्राचार्य: प्रो.लक्ष्मीनिवासपाण्डेमहोदय:। कार्यक्रमस्यास्य अध्यक्षतामकरोत् परिसरीयप्राचार्य: प्रो.सुरेन्द्रपाठकवर्य्य:। कार्यक्रमस्य सञ्चालनं डॉ.एस्.पि.सिंहमहोदयेन कृतम्। अस्मिन् कार्यक्रमे परिसरीया: प्राध्यापका: सर्वे कर्मचारिण: छात्राश्च समुपस्थिता: आसन्। कार्यक्रमे प्रो.रामलखनपाण्डे, प्रो.मदनमोहनपाठक:, प्रो. लक्ष्मीनिवासपाण्डे, प्रो. सुरेन्द्रपाठकमहोदयश्च विषयस्य अभिव्यक्तिं कृतवन्त:। कार्यक्रमस्य समापनं राष्ट्रियगीतेन सञ्जातम्।


दीपं प्रज्वलयति अतिथिमहोदय:

### राष्ट्रियापत्प्रबन्धनप्रशिक्षणम्

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरेण २०१६ तमवर्षस्य नवम्बरमासस्य अष्टमे दिनाङ्के प्रात: ११ वादने राष्ट्रियापत्प्रबन्धनविषयककार्यक्रमस्यायोजनं कृतम्। माल्यापर्णानन्तरं वैदिक-लौकिकमङ्गलाचरणं परिसरीयच्छात्रा: अकुर्वन्। मुख्यवक्तृरूपेण समुपस्थितेन प्रो.सी. पी.बर्थवालमहोदयेन "राष्ट्रिय-आपदा-प्रबन्धन" इति विषये वैदुष्यपूर्णं व्याख्यानं प्रस्तुतम्। कार्यक्रमस्यान्ते प्रो.लोकमान्यमिश्रमहोदयेन अध्यक्षीयभाषणं कृतम्। डॉ.एस.पि.सिंहमहोदयेन कार्यक्रमस्य सञ्चालनं विहितम्। धन्यवादज्ञापनं हिन्दीविभागस्य सङ्कायाध्यक्ष: प्रो.शिशिर-कुमारपाण्डेयमहोदय: अकरोत्। कार्यक्रमे सर्वे प्राध्यापका: कर्मचारिण: छात्राश्च समुपस्थिता: आसन्।

### आरोग्यमित्रप्रशिक्षणशिबिरम्

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे नवम्बरमासस्य द्वादशत्रयोदशदिनाङ्कयो: (१२.११.२०१६-१३.११.२०१६) आरोग्यमित्रप्रशिक्षण-शिबिरस्य आयोजनं जातम्। कार्यक्रमस्यास्यायोजनम् आरोग्यभारत्या कृतम्। कार्यक्रमे परिसरप्राचार्य: प्रो.सुरेन्द्रपाठकवर्य: समुपस्थित: आसीत्। आरोग्यभारतीकार्यकर्तार: प्रो.एल.बी.भट्ट:, डॉ.बी.एन्.सिंह:, पद्मश्री ब्रह्मदेवशर्मा, डॉ.रामकपूर:, डॉ.मुरलीकृष्ण:, डॉ.अभयनारायणतिवारि-

प रि स र वा र्ता

महोदयश्च उपस्थिताः आसन्। कार्यक्रमस्योद्घाटनं भगवतः धन्वन्तरेः पूजया सञ्जातम्। कार्यक्रमेऽस्मिन् विविधप्रकारकरोगाणां निवारणाय समुचितोपायानां विषये प्रशिक्षणं प्रदत्तम्। कार्यक्रमस्य समापनं १३ दिनाङ्के सायं ५ वादने प्रमाणपत्रवितरणेन, शान्तिमन्त्रोच्चारणेन च सह जातम्। कार्यक्रमे केचन प्राध्यापकाः, छात्राश्च प्रायः ९० सङ्ख्याकाः भागमगृह्णन्।

### मद्यनिषेधजागरूकतासमारोहः

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे नवम्बरमासस्य १८ दिनाङ्के सायं त्रिवादनतः पञ्चवादनं यावत् मद्यनिषेधजागरूकतासमारोहः समायोजितः। अस्य कार्यक्रमस्य प्रारम्भः सरस्वत्याः माल्यार्पणेन जातः। कार्यक्रमेऽस्मिन् परिसरप्राचार्यस्य प्रो.सुरेन्द्रपाठकमहोदयस्य अध्यक्षत्वे छात्राः मद्यनिषेधविषये प्रस्तुतीकरणमाध्यमेन स्वकीयप्रतिभां प्रदर्शितवन्तः। परिसरीयाः सर्वे प्राध्यापकाः, कर्मचारिणः, छात्राश्च भागमगृह्णन्। कार्यक्रमस्यास्य सञ्चालनदायित्वं डॉ.एस्.पी.सिंहमहोदयः ऊढवान्।

### भारतीयसंविधानदिवसः

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे केन्द्रसर्वकारस्य निर्देशानुसारं नवम्बरमासस्य भारतीयसंविधानदिवसः २५ दिनाङ्के आयोजितः। अस्य कार्यक्रमस्यायोजनं परिसरस्य कार्यवाहकः प्राचार्यः प्रो.विजयकुमारजैनमहोदयस्य आध्यक्षे सम्पन्नम्। कार्यक्रमेऽस्मिन् संविधानविषये व्याख्यानं प्रस्तुतं राजनीतिशास्त्रस्य प्राध्यापकेन डॉ.जगन्नाथझामहोदयेन। कार्यक्रमेऽस्मिन् सर्वे प्राध्यापकाः कर्मचारिणः, छात्राश्च समुपस्थिताः आसन्। धन्यवादज्ञापनं शिक्षाशास्त्रविभागाध्यक्षेण प्रो.लोकमान्यमिश्रमहोदयेन कृतम्। कार्यक्रमस्यास्य समाप्तिः राष्ट्रगानेन जातम्।

### सत्रार्धपरीक्षाः

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे दिसम्बरमासस्य ०६ दिनाङ्कतः २३ दिनाङ्कं यावत् सत्रार्धपरीक्षायाः आयोजनं जातम्। सर्वेऽपि छात्राः स्वाधीतविषयस्य सम्यक् सिद्धतां कृत्वा परीक्षाः अलिखन्। परीक्षाः २३ दिनाङ्के सुचारुतया सम्पन्नाः।

## राजीवगान्धीपरिसरवृत्तान्तः



वाक्यार्थपरिषदः एकं दृश्यम्

### वाक्यार्थः

२४.१०.१६ तमे दिनाङ्के परिसरेऽस्मिन् अध्यापकवाक्यार्थपरिषदः तृतीयमधिवेशनं प्रो. इन्दिरावर्याणां पर्यवेक्षकत्वे सम्पन्नम्। तत्र प्रो. सुब्रायभट्टा उपमानप्रमाणमिति विषये डॉ. रामचन्द्रुल-बालाजिवर्याः व्यवहार इति विषये डॉ. चन्द्रकलावर्याः काव्यलक्षणेऽदोषावित्यत्र नञर्थविचारः इति विषये डॉ.आर्.नवीनवर्या आकाङ्क्षा विचार इति विषये च वाक्यार्थान् कृतवन्तः।

०८.१२.२०१६ दिनाङ्के वाक्यार्थपरिषदः चतुर्थम् अधिवेशनम् आचार्याणां सुब्रायभट्टानां पर्यवेक्षकत्वे सम्पन्नम्। तत्र प्रो. इन्दिरावर्याः व्यतिरेकालङ्कार इति विषये डॉ. वेङ्कटेशमूर्तिवर्याः दूरस्थशिक्षाविचारः इति विषये डॉ. श्याम-सुन्दरवर्याः प्रतिबध्य-प्रतिबन्धक-विचारः इति विषये डॉ. सुधांशुकुमारवर्याः वास्तुशास्त्रानुसारं निर्मितं गृहं पुरुषार्थसाधकम् इति विषये च वाक्यार्थान् अकार्षुः।



शारदाविशिष्टव्याख्यानमालायां व्याख्यानं विदधानः अतिथिवर्यः

### कर्णाटकराज्योत्सवसमाचरणम्

नवम्बरमासस्य चतुर्थे दिनाङ्के परिसरेऽस्मिन् कन्नडराज्योत्सवः समाचरितः। कार्यक्रमस्य मुख्याभ्यागतत्वेन केन्द्रीयविद्यालयस्य निवृत्ताः प्रांशुपालाः श्रीमन्तः सर्पङ्गळ ईश्वरभट्टवर्याः समागताः आसन्। उत्सवमभिलक्ष्य सायं चतुर्वादनतः श्री रामनिर्याणमिति यक्षगानताळमद्दळे कार्यक्रमः अयोजित आसीत्। छात्राणां कृते विविधाः स्पर्धाः समायोजिषत। सर्वासु स्पर्धासु छात्राः भागं गृहीत्वा पुरस्कारान् प्राप्नुवन्। समायोजकत्वेन डॉ. चन्द्रकान्तवर्याः डॉ. कवितावर्याश्च नियुक्ता आसन्।

डिसेम्बरमासस्य २४ तः २ जनवरी २०१७ पर्यन्तं परिसरेऽस्मिन् केन्द्रीयविद्यालयाध्यापकानां सेवाकालिकप्रशिक्षणवर्गः समभूत्। डॉ. हरिप्रसादवर्यः संयोजकः आसीत्। तत्र डॉ. नारायणवैद्यवर्यः, डॉ. प्रमोदभट्टवर्यः, श्री रवीश एन् वर्यश्च सहायका आसन्। देशस्य विविधराज्येभ्यः संसाधकाः समागताः आसन्। वर्गेऽस्मिन् केन्द्रीयविद्यालयस्य सप्तत्रिंशदध्यापकाः भागमगृह्णन्।

अक्टोबरमासे १६ तः २५ पर्यन्तं शिरसिमण्डलस्य गोळी प्रान्ते श्री सिद्धिविनायक-मन्दिरे प्रवृत्ते संस्कृतसम्भाषणप्रशिक्षणवर्गे परिसरस्य शिक्षाशास्त्रिच्छात्राः भागं गृहीतवन्तः। सन्दर्भेऽस्मिन् विभागीया अध्यापकाः मार्गदर्शकरूपेण गताः।

# एकलव्यपरिसरवार्ता:

## राज्यस्तरीयभाषणस्पर्धा:



राज्यस्तरीयस्पर्धायां सम्बोधयन् परिसरप्राचार्य:

राष्ट्रियसंस्कृतसंस्थानस्य आदेशानुसारेण त्रिपुरास्थ – एकलव्यपरिसरे अक्टोबर् मासस्य २२ दिनाङ्के राज्यस्तरीय-शास्त्रीयभाषण-प्रतियोगिता: प्रचलिता:। २२ दिनाङ्के प्रात: १० वादने परिसरप्राचार्या: आचार्या: सर्वनारायणझा: महोदया: कार्यक्रमममुं दीपप्रज्वलनपुरस्सरं समुद्घाटितवन्त:। 'राष्ट्रियसंस्कृतसंस्थानेन शास्त्राध्येतृणामुपकाराय प्रतिवर्षं राष्ट्रस्तरीय-शास्त्रीयप्रतियोगिता: आयोज्यन्ते, यत्र विंशत्यधिकराज्येभ्य: प्रतिभागिन: स्वप्रातिभप्रदर्शनं कुर्वन्ति। तदङ्गतया त्रिपुराराज्यस्तरीयशास्त्रीयप्रतियोगितापि आयोजिता वर्तते। एतादृशस्पर्धासु छात्रा: अहमहमिकया भागं गृहीत्वा शास्त्राध्ययनतत्परा: भवेयु:। स्पर्धाद्वारा शास्त्राध्ययनोत्साह: इतोऽपि वर्धते' इति तै: प्रतिपादितम्।



पुरस्कारं वितरन्त: अतिथय:

कार्यक्रमेऽस्मिन् विशिष्टातिथिरूपेण एकलव्यपरिसरस्य धर्मशास्त्रविभागाध्यक्षा: खगेश्वरमिश्रा: समागत्य आशीर्वचोभि: छात्रान् अन्वग्रहीषु:। कार्यक्रमेऽस्मिन् साहित्य-व्याकरण-ज्यौतिष-धर्मशास्त्र-वेदान्त-सांख्य-बौद्धदर्शनेषु विंशत्यधिकच्छात्रा: शास्त्रीयविषयेषु भाषणं अकुर्वन्। परिसरीयाध्यापका: अन्ये च कर्मचारिण: उपस्थिता: आसन्।

## राष्ट्रियैकतासप्ताह:

सरदार-वल्लभभाईपटेलमहोदयस्य जन्मदिनमुपलक्ष्य परिसरे राष्ट्रियैकतासप्ताह: अक्टोबर् मासस्य ३१ दिनाङ्कादारभ्य नवम्बर् मासस्य ७ दिनाङ्कपर्यन्तं समाचरित:। अक्टोबर् ३१ दिनाङ्के एकतासप्ताहस्य उद्घाटनं दीपप्रज्वलनेन परिसरस्य शिक्षाशास्त्रविभागाध्यक्षा: डॉ. पवनकुमारमहोदया: अकुर्वन्। स्वकीयाध्यक्षभाषणे पटेलमहोदयानां जीवनस्य परिचयपुरस्सरं अखण्डभारतनिर्माणे तेषां योगदानं च वर्णितवन्त:। कार्यक्रमे साहित्यविभागीयप्राध्यापका: डॉ. कृपाशङ्करशर्ममहोदय:, शिक्षाशास्त्रविभागप्राध्यापक: डॉ. गौराङ्गबाघ् महोदय, अन्ये परिसरीयाध्यापका: छात्राश्च उपस्थिता आसन्।

एकतासप्ताहमुपलक्ष्य आसप्ताहं यावत् छात्रेभ्य: निबन्धलेखनस्पर्धा, घोषवाक्यनिर्माणस्पर्धा, एकतागीतगायनस्पर्धा, भाषणस्पर्धा च आयोजिता। नवेम्बर् मासस्य ७ दिनाङ्के अस्य एकतासप्ताहस्य समापनसमारोह: अनुष्ठित:। धर्मशास्त्रविभागाध्यक्षा: आचार्या: खगेश्वरमिश्रा: कार्यक्रमममुं समुद्घाट्य पटेलमहोदयानां गुणगानं अकुर्वन्। साहित्यविभागाध्यक्षा: आचार्या: सच्चिदानन्दतिवारिमहोदया: व्याकरण-विभागाध्यक्षा: आचार्या: धनीन्द्रकुमारझामहोदया: च वेदिकायाम् उपस्थिता: आसन्। अन्ते स्पर्धासु विजेतृभ्य: छात्रेभ्य: पुरस्कारा: प्रदत्ता:। श्रीविश्वनाथहेगडे महोदय: धन्यवाद आविष्कृतवान्। डॉ. दीपकुमार: सभासञ्चालनं कृतवान्।



निरीक्षणं विदधान: आचार्य: रामानुजदेवनाथवर्य:

## शैक्षिकपरामर्शसमिते: निरीक्षणम्

अक्टोबर् मासस्य २५ तमे दिनाङ्के एकलव्यपरिसरे शैक्षिकपरामर्शनसमिते: पर्यवेक्षणं समभूत्। जगद्गुरुरामानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरा: आचार्या: के.वि. रामकृष्णनाचार्या:, राष्ट्रियसंस्कृतसंस्थानस्य जम्मूपरिसरस्य प्राचार्या: आचार्या: रामानुजदेवनाथन् महोदया:, मुम्बईपरिसरस्य प्राचार्या: आचार्या: सुदेशकुमारशर्माणश्च पर्यवेक्षकगणे आसन्। परिसरस्य प्राचार्या: आचार्यसर्वनारायणझामहोदया: शैक्षिकपरामर्शनसमितिसदस्यानां स्वागतं कृत्वा तेभ्य: परिसरस्य इतिवृत्तं निवेदितवन्त:। पर्यवेक्षणानन्तरं प्रवृत्ते समारोहे प्राचार्या: समितिसदस्यानां सम्माननम् अकुर्वन्। परिसरविभागाध्यक्षा, अध्यापका: छात्राश्च उपस्थिता: आसन्।

# युवमहोत्सवस्य विहङ्गमदृश्यानि



# राष्ट्रियसंस्कृतसंस्थानम्

## ( मानितविश्वविद्यालयः )

**( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः )**

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058

दूरभाषः 011-28524993, 28521994, 28524995

## योजनायाः अन्तर्गतं वित्तीयसहायतार्थम् अधिसूचना

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य तत्त्वावधाने नवदहलीस्थेन राष्ट्रियसंस्कृतसंस्थानेन २००७ तमवर्षीयायाः संस्कृतविकासपुनरीक्षितयोजनायाः अन्तर्गततया अधोनिर्दिष्टेभ्यः कार्येभ्यः २०१७-१८ तमवर्षस्य वित्तीयसहायतानुदानं निमित्तीकृत्य पूर्वनिर्धारितप्रपत्रानुगुणम् आवेदनपत्राणि निमन्त्र्यन्ते–

१. संस्कृतशिक्षणाय वित्तीयसहायता–

(क) पारम्परिकसंस्कृतपाठशालासु, विद्यालयेषु, महाविद्यालयेषु च संस्कृताध्यापकेभ्यः वेतनानुदानम्।

(ख) पारम्परिकसंस्कृतपाठशालासु, विद्यालयेषु, महाविद्यालयेषु च आधुनिकविषयाध्यापकेभ्यः वेतनानुदानम्।

(ग) राज्यसर्वकारसम्बद्धेषु माध्यमिकविद्यालयेषु उच्चतरविद्यालयेषु च संस्कृताध्यापकेभ्यः वेतनानुदानम्।

२. देशे अभावग्रस्तपरिस्थितौ स्थितेभ्यः प्रसिद्धसंस्कृतपण्डितेभ्यः, अध्यापकेभ्यश्च सम्मानराश्यनुदानम्।

३. सर्वकारेतरसङ्घटनेभ्यः, मानितसंस्कृतविद्यालयेभ्यः, विभिन्नशोधपरियोजनाभिः कार्यक्रमैः वा युक्तेभ्यः विश्वविद्यालयेभ्यः, संस्कृतसंवर्धनगतिविधिभ्यश्च वित्तीयसहायतानुदानम्।

४. संस्कृतस्य दुर्लभपुस्तकानां पुनर्मुद्रणाय प्रकाशनाय संस्कृतपुस्तकानां नैकप्रतिकृतिक्रयणाय च वित्तीयसहायतानुदानम्।

५. सेवानिवृत्तानां, प्रसिद्धसंस्कृतविदुषां (शास्त्रचूडामणीनां) सेवायाः उपयोगाय वित्तीयसहायतानुदानम्।

६. पारम्परिकसंस्कृतपाठशालासु/संस्थासु च विद्यमानानां छात्राणां व्यावसायिकप्रशिक्षणकार्यक्रमार्थं पञ्जीकृतशैक्षिकसङ्घटनादिभ्यः वित्तीयसहायतानुदानम्।

७. संस्कृतशिक्षणस्य मानकानां सम्पोषणाय विश्वविद्यालयेभ्यः मानितविश्वविद्यालयेभ्यः सी.बी.एस.ई./एन.सी.ई. आर्.टी./ एस्.सी.ई.आर्.टी. प्रभृतिभ्यः च वित्तीयानुदानम्।

अधिसूचनायाः तिथिः– १८.०१.२०१७

आवेदनपत्रसमर्पणाय अन्तिमा तिथिः – ३१.०३.२०१७

नियमविवरणम् आवेदनपत्राणि च संस्थानस्य जालपुटे (www.sanskrit.nic.in) द्रष्टुं शक्नुवन्ति।

**कुलसचिवः**

Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.IX Issue No.34 Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007